नटी :- अहं कविकुलगुरुकालिदासविरचितं कुमारसम्भवं काव्यं पठन्ती आसम्। तत्र शिवस्य तपोभङ्गं कर्तुम् उद्युक्तः कुसुमायुधः भगवता शिवेन तृतीयनेत्राग्निना भस्मीकृतः। ततश्च भूतनाथः तत्रैव अन्तर्दधे। शिवसेवायाम् उपस्थिता गिरिराजकन्याऽपि भग्नमनोरथा पितुर्गृहं जगाम। मदनसखी रतिः अनाथा इव अधुना रोदिति। पतिवियोगजनितं दुःखं सोढुम् असमर्था रतिः किं करिष्यति। तस्याः तादृशीम् अवस्थां दृष्ट्वा दुःखितास्मि।

सूत्रधार :- एवम्। अयि मुग्धे त्वया न पठितः तत्र पञ्चमः सर्गः। रतिमदनयोर्विना कथं जीवनव्यवहारः अस्मिन् जगति सम्भवति। तर्हि स्थिरा भव। महाकवेः कुमारसम्भवकाव्यस्य पञ्चमसर्गम् अधिकृत्य एव प्रस्तूयते अधुना मया एतत् तपःफलोदयः नाम नाटकम्। एहि। पश्यावः। (निर्गतौ।)

(द्वितीयः प्रवेशः।)

(रङ्गमञ्चे एकाकिनी पार्वती। मृगाजिनमण्डितासनस्था ध्यानमग्ना।)

पार्वती :- ॐ नमो भवाय। ॐ नमः शर्वाय। ॐ नमो रुद्राय। ॐ नमः पशुपतये। ॐ नमो उग्राय। ॐ नमः सहाय।
ॐ नमो भीमाय। ॐनमो ईशानाय। ॐ नमो ...।

विजया :- (प्रविश्य) सखि पार्वति। सखि ...।

पार्वती :- ॐ नमो भवाय।

विजया :- सखि क्षन्तव्यः अयं ममापराधः।

पार्वती :- (अक्षिणी उन्मील्य) अये कथम्। सखी मे विजया प्राप्ता। सखि कथमेतावत् ते धाष्ट्यर्म्। मम तपोभङ्गं कर्तुं कथं त्वम् उद्युक्ता। अयुक्तमेतत्।

विजया :- सखि क्षम्यतामयं जनः। तत्र भवत्या देव्या मेनया अतिव्याकुलया उक्तम्।

पार्वती :- किम्।

विजया :- उ। हे वत्से मा। मा कुरु ईदृशं तपश्चरणम्। अनेन न किमपि सेत्स्यति। उ - मा। उ - मा। इति ते मात्रा वारं वारम् उक्तापि कथं त्वम् अद्यापि अस्मिन् घोरे तपसि स्थितासि।

पार्वती :- माता तु माता एव भवति। वात्सल्यादेव सा मां तपसः निवारयति। यत्किमपि कष्टकरम् अपत्यानां कृते तस्मात् सा अपत्यान् निवारयति।

विजया :- तर्हि मातुरिच्छाम् अनादृत्य कथं त्वया ...।

पार्वती :- न तत्र अनादरस्य लेशोऽपि वर्तते। मनोवाञ्छितकामनासिद्ध्यर्थम् एष मे निश्चयः। हरम् एव पतिरूपेण वाञ्छामि। तेन विना जीवितुं नोत्सहे।

विजया :- सखि असम्भाव्यमेतत्। तव अक्ष्णोः पुरतः एव देवैर्निवारितः अपि भगवान् शिवः आत्तधनुषं मदनं भस्मसात् अकरोत्। स तपस्वी शिवः स्त्रीसंनिकर्षं परिहर्तुमिच्छन् तत्क्षणमेव ततः अन्तर्हितः। मदनसखी - मदनेन विनाकृता रतिः देहविमुक्तये उद्युक्ता। मन्ये न द्रवति तस्य पशुपतेः तपःकठोरं हृदयम्। त्यज एतम् अभिलाषम्। एहि। एहि मया सार्धम्। देवी मेना तवागमनं प्रतिपालयति।

पार्वती :- सखि विजये शृणु। एष मे निश्चयः। यदि भगवतः शिवस्य तपःकठोरं हृदयं न द्रवति तर्हि एष मे कायः अस्मिन् एव शिखरे उग्रात्युग्रेण तपसा विलयं यास्यति।

विजया :- मा। मा एवम्। हे गौरि, हिमगिरेः एतत् शिखरं - तव तपसा पुण्यभूतम् एतत् शिखरं - लोकेषु गौरीशिखरम् इति नाम्ना विश्रुतम्। अद्यावधि त्वया आचरितं तपः अपि तादृशमेव अत्युच्चम् अतुलनीयम् च। अधुना निवर्तस्व। निवर्तस्व अस्मात् दुःसाहसात्। एहि। पितुस्ते गेहे न केवलं बन्धुजनाः परं सखीजनाः अपि त्वत्कृते परिशुष्यन्ति।

पार्वती :- जानामि। जानामि सखीजनस्नेहम्। परं यावन्मे प्राणसखा त्रैलोक्यनाथः पशुपतिः सुप्रीणितः न भवति तावत् तदर्पितप्राणा अहम् अत्रैव तपश्चरणं कुर्वन्ती स्थास्यामि। सखि निवर्तस्व अधुना। गच्छ। गच्छ शीघ्रम्। हिंस्रैः श्वापदैः आकीर्णः ते मार्गः।

विजया :- न भीतास्मि हिंस्रेभ्यः श्वापदेभ्यः। परमाकम्पितास्मि अनेन ते निश्चयेन। हन्त। किं कथयानि। अहो परिणामः तपसः। मन्ये तपसा पुरुषाणां स्त्रीणां च हृदयानि कठोराणि एव भवन्ति। तेषां हृदयेषु कोमलतायाः लेशोऽपि न अवशिष्यते। हरस्य इव कुसुमकोमलायाः तवापि हृदयं वज्रकठोरं सञ्जातमिव दृश्यते। अतःपरं न किमपि वक्तुमुत्सहे। भग्नाशा अहम् एतम् वृत्तान्तं देव्यै मेनायै कथयिष्यामि। एषा प्रस्थितास्मि।

(विजया निर्गता। पार्वती पुनरपि पद्मासनसंस्थिता नेत्रे निमील्य गायति।)

स्मरारे पुरारे प्रभो नीलकण्ठ ।
वृतस्त्वं मया शर्व देवाधिदेव ।।
हृदम्भोजकोशान्तरं सन्निविष्ट ।
त्वदीयः प्रसादोऽस्तु मे स्वामिनाथ ।।

बटु :- (प्रविश्य आत्मगतम्) अहो कथम्। एषा गौराङ्गी अस्मिन् हिमगिरेः काञ्चनशृङ्गे एकाकिनी तपश्चरणं करोति। अथवा अद्भुतमेतत्। यत् सर्वैश्वर्यपूर्णाः अपि प्राणिनः कस्यै अपि ऐश्वर्यप्राप्तये एव तपश्चरणं कुर्वन्ति। तपोनिष्ठा अनन्यचित्ता एषा मम आगमनमपि न जानाति। ज्ञापयामि एनाम्। (प्रकटम्) अयमहं भोः।

BVBSSMV

पार्वती :- (ब्रह्मचारिणं दृष्ट्वा स्वगतम्) अहो अतिथिः सम्प्राप्तः। प्रज्वलन् इव आत्मतेजसा अयं बटुः साक्षात् ब्रह्मचर्याश्रमः इव मे प्रतिभाति। (आसनादुत्थाय पुरःसृत्य) स्वागतम्। एतद् आसनम्। अलङ्क्रियताम्। (पार्वती अर्घ्यं दत्त्वा पादवन्दनं करोति।)

बटु :- कल्याणमस्तु।

पार्वती :- उपकृतास्मि दर्शनेन। भोः ब्रह्मचारिन्। स्वागतम् अस्मिन् तपोवने।

बटु :- तपस्विनि, सन्तुष्टोऽस्मि अनेन ते आचारेण। अपि सुलभा ते तपश्चरणक्रिया। अपि हिंस्रैः श्वापदैः विवर्जितः एष प्रदेशः। अपि करस्थदर्भप्रणयापहारिषु हरिणेषु प्रसन्नं ते मनः। अपि सुलभं शीतलं निर्मलं जलम्। अपि सुलभानि आहारार्थं कन्दमूलफलानि।

पार्वती :- भोः ब्रह्मचारिन् सर्वं सुलभम् अत्र भवत्कृपया। किन्तु किं मया एतैः पत्रपुष्पफलैः।

बटु :- कस्मात्।

पार्वती :- शृणोतु भवान्। घोरातिघोरम् एतत् तपः। अशनं सर्वथा परित्यक्तम्। केवलं वायुरेव पीयते। वायुरेव भुज्यते।

बटु :- किं जीवितार्थं गलितानां पाण्डुपत्राणाम् अपि आहारः न क्रियते।

पार्वती :- नैव क्रियते। अन्यथा कोऽर्थः अनशनस्य।

बटु :- अपि भवती हिमवतः पुत्री।

पार्वती :- आम्।

बटु :- धन्यासि हे पार्वति। गलितानां पर्णानामपि अस्वीकारात् ननु अपर्णा इत्येव त्वम् अभिज्ञातव्या।

पार्वती :- आम्। सख्यः मे माम् अपर्णा इत्येव आह्वयन्ति।

बटु :- कुतस्ते सख्यः।

पार्वती :- एतद् व्रतं दृष्ट्वा मम जीविताशङ्किन्यः ताः एतां वार्तां श्रावयितुं मत्पितृसकाशं नगाधिराजं प्रति गताः।

बटु :- अहह। गिरिजे अस्थाने खलु एतत् तपश्चरणम्। अनेन तपश्चरणेन शक्तिक्षयः ते भविष्यति। शरीरं ते विनंक्ष्यति।

पार्वती :- नश्यतु नाम।

बटु :- अपि न श्रुतं त्वया।

68\ BVBSSMV

पार्वती :- किम्।

बटु :- शरीरमाद्यं खलु धर्मसाधनम् इति।

पार्वती :- (सस्मितम्) जानामि। ब्रह्मचारिन् जानामि। किन्तु किं मम एतेन शरीरेण यदि विफलाः मे मनोरथाः।

बटु :- मनोरथः। गिरिजे कस्ते मनोरथः। नगाधिराजकन्या असि। न ते किमपि दुर्लभम्। बलवतः पितुस्ते गेहे नास्ति ते अवमानस्य सम्भवः। पराभिमर्षः नास्ति एव। प्रथमस्य वेधसः कुले प्रसूतिः। त्रिलोकसौन्दर्यम् उदितम् इव वपुः। अनन्तम् ऐश्वर्यसुखम्। नवं च वयः। किम् अन्यत् तपःफलं वाञ्छनीयम्। किमर्थं यौवने देवदुर्लभम् ऐश्वर्यम् अपास्य एष वार्धक्यशोभिपथः त्वया अनुसृतः।

पार्वती :- भोः ब्रह्मचारिन्। न अकारणम् एतत् तपश्चरणम्।

बटु :- तदेव प्रष्टुकामोऽस्मि। न केवलं दिवश्च्युतैः गाङ्गैः सलिलैः एव परं त्वदीयै अनाविलैः चरितैः पावितः एष प्रदेशः। यदि स्वर्गं वाञ्छसि तर्हि एष ते पितुः प्रदेशः एव देवभूमिः। अथ यदि उपयन्तारं प्रार्थयसे तर्हि अलं समाधिना। हे अनवद्याङ्गि रत्नं न अन्विष्यति। मृग्यते हि तत्।

पार्वती :- (सक्रोधम्) भोः ब्रह्मचारिन् मां तपश्चरणात् विमुखीकर्तुम् एष ते प्रयत्नः कदापि सफलः न भविष्यति। मन्ये मम जीविताशङ्कया मात्रा तातेन वा प्रेषितोऽसि। अलम् एतैः यत्नैः। एष मे दृढनिश्चयः। यावत् तपःफलं मे उदितं न स्यात् तावत् ...।

बटु :- तिष्ठ। तिष्ठ। नाहं केनापि प्रेषितः। न वा कस्यापि प्रेष्यः भवितास्मि। हिमवतः पुण्यप्रदेशे अस्मिन् अरण्ये मनःपूतं सञ्चरामि। तस्मिन् अभ्यन्तरे मया त्वम् अत्र दृष्टा। त्वया च सत्कृतः अर्घ्येण स्वागतवचनैः च। हे सन्नतगात्रि मनीषिभिः सङ्गतं साप्तपदीनमुच्यते। तव स्वागतपदैः अस्माकम् एतत् सख्यम्। तस्मात् सख्यात् द्विजातिभावात् उपपन्नचापलाच्च मया सानुकम्पया एतत् पृच्छ्यते। न केनापि अन्येन हेतुना।

पार्वती :- क्षम्यताम् अयं जनः।

बटु :- वद भामिनि कस्ते अभिलाषः।

पार्वती :- शृणोतु भवान्।

बटु :- अवहितोऽस्मि।

पार्वती :- ऐश्वर्यप्राप्तिः स्वर्गप्राप्तिः अवमानस्य प्रतिशोधः वा सामान्याः हेतवः। मम अभिलाषस्तु फलविशेषे। स प्रार्थितदुर्लभः यदि मां न स्वीकरिष्यति तर्हि तनुत्यागेनैव अस्य तपसः अन्तः।

बटु :- गिरिराजकन्ये, न दृश्यते प्रार्थितव्यम् एव ते। तर्हि कथम् प्रार्थितदुर्लभः। दयिते। ईदृशी सुभगा तनूः महता तपसापि न लभ्यते। तस्याः अवसानाय अपि त्वं सिद्धा। इत्यतः जानामि ते तस्मिन् दृढां बुद्धिम्। हे गौराङ्गि ज्ञातम् अनेन ते निश्चयेन यत् निर्दयहृदयः एव ते हृदयवल्लभः यः त्वाम् एवम् उपेक्षते। हे गौरि अस्ति मम पूर्वाश्रमसंचितं तपः यस्य अर्धभागेन लभस्व काङ्क्षितं वरम्। इति आशीः। (पार्वती नमस्करोति।) कथय अधुना। को युवा त्वया काङ्क्षितः। किं नामधेयः। कुतूहलस्य मे निराकरणं कर्तुम् अर्हसि।

पार्वती :- हे ब्रह्मचारिन्। व्रीडाम् अनुभवामि तस्य स्मरणादपि। तर्हि कुतो नामोच्चारणम्।

बटु :- भण। विनासंकोचं भण। जानामि ते तस्मिन् दृढाम् अनुरक्तिम्। कन्यके वद। किं स देवेन्द्रः। अथवा जगच्चालकः भगवान् विष्णुः। अथवा नरविग्रहधारी कोऽपि पुमान्, गन्धर्वः यक्षः किन्नरो वा।

पार्वती :- वदामि ते कुतूहलशमनार्थम्। नैतद् मे अनार्यत्वम् इति मन्यताम्। श्रूयताम्।

वृणोमि देवमीशानं भूतानामीश्वरं विभुम् ।
अघोरं जगदाधारं नीलकण्ठं महेश्वरम् ।।

बटु :- किम्। किमाह भवती। न विश्वसिमि मम कर्णयोः। अपि मया सम्यक् श्रुतम्। स मदनारिः महेश्वरः त्वया प्रार्थ्यते।

पार्वती :- आम्। स एव प्रार्थितदुर्लभः मया काङ्क्षितः।

बटु :- अविचारः। अविचारः खलु एषः। स महेश्वरः विदितः एव सर्वैः। अमङ्गलाचारे एव तस्य रतिः। नाहं त्वाम् अनुमन्तुं शक्नोमि। मदनं हत्वा तेन त्वं प्रागेव भग्नमनोरथा कृता। मनोव्यवहारविषये अनभ्यस्तः अपि अहं तेन तवोद्वाहम् अभिनन्दितुं नोत्सहे। हे सुन्दरि रत्नं काञ्चनेन समागच्छतु। न येन केनापि अश्मना। क्व त्वादृशी गौराङ्गी मृगनयना क्व च स चिताभस्मधारी त्रिनयनः। हे अवस्तुनिर्बन्धपरे पार्वति त्वमेव चिन्तय। कथमयं ते आमुक्तविवाहकौतुकः करः शम्भोः अहिना वलयीकृतकरेण प्रथमावलम्बनं

सहिष्यते। कथं ते कलहंसलक्षणं वधूदुकूलं शोणितबिन्दुवर्षिणा गजाजिनेन संयोगमर्हति। कथं पुष्पावकीर्णेषु गृहेषु न्यासार्हे अलक्ताङ्कित्ते ते पदकमले तस्य शिवनिवासस्य केशविकीर्णासु प्रेतभूमिषु न्यासं कर्तुम् अर्हतः।

पार्वती :- हे ब्रह्मन् यानि कानि च भूतानि अत्र जीवन्ति जीविष्यन्ति वा इतो गमिष्यन्ति वा तेषां सर्वेषाम् आधारकेतनः मङ्गलानां मङ्गलं, सर्वेषां भूतानाम् ईश्वरः स शिवंकरः। सा श्मशानभूमिरपि मत्कृते शिवस्मितचन्द्रिकया विलसमाना नन्दनवनभूमिरेव।

बटु :- अहो मतिभ्रंशः। अहह। भर्तुः भवस्य भस्माङ्गरागात् हरिचन्दनास्पदे ते उरसि चिताभस्मरजः पदं करिष्यति। गिरिजे विडम्बना खलु एषा यत् त्वादृशी गजराजार्हा त्रैलोक्यसुन्दरी राजकुमारी तं वृद्धोक्षं आरुह्य पत्या सह गमिष्यति। अनेन ते पिनाकिनः समागमप्रार्थनया सर्वं खलु शोचनीयतां गतम्। हे बालमृगाक्षि कथं स विरूपाक्षः त्वया प्रार्थ्यते। तस्य दिगम्बरत्वेन एव उद्घोषितं तस्य अकिञ्चनत्वम्।

पार्वती :- अलम्। अलमनया निन्दया। सर्वासु दिक्षु याः सम्पदः भवन्ति तासां सर्वासां स्वामी भूत्वापि अपरिग्रहवृत्तिः स दिगम्बरः इति विख्यातः।

बटु :- हे सुन्दरि, कन्या वरयते रूपं माता वित्तं पिता श्रुतम्। बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरेजनाः। इति लोकानाम् आभाणकः। तत्र किञ्चिदपि तस्मिन् नास्ति। हे कुलकन्यके श्मशानवासिनः तस्य शङ्करस्य किं कुलम्। कस्तस्य पिता का वा माता। यान् गुणान् कामिन्यः वरयन्ते तेषु एकोऽपि न दृश्यते तस्मिन् दिगम्बरे। त्यज एतं दुरभिलाषम्।

पार्वती :- (सक्रोधम्) हे ब्रह्मचारिन् अनभिज्ञसामर्थ्यः त्वं हरस्य। अतः एवं ब्रवीषि। हरं परमार्थतः न वेत्सि अतः माम् एवम् आत्थ। त्वादृशाः मन्दाः एव अलोकसामान्यम् अचिन्त्यहेतुकं महात्मनां चरितं द्विषन्ति। शास्त्राण्यधीत्य अपि शास्त्रवादरताः त्वादृशाः जडधियः सर्वशास्त्रकर्तारं शिवं न जानन्ति। चिताभस्मलेपः खट्वाङ्गं नृकरोटिः पन्नगाभरणानि एतानि सर्वाणि अमङ्गलानि सर्वमङ्गलकरस्य शम्भोः एव शोभन्ते। अकिञ्चनोऽपि स सर्वसम्पदां प्रभवः। पितृसद्मगोचरः अपि त्रैलोक्यभूषणधारी। भीमरूपः अपि कल्याणमयः। निर्भूषणः अपि सर्वभूषणधरः। किं तस्य त्रैलोक्यनाथस्य सामान्यैः आभूषणैः।चिताभस्म अपि तस्य विग्रहसम्पर्कात् विशुद्धये प्रभवति। केवलं

मूढतया एव त्वया एतदुक्तम्।

बटु :- परं कुलहीनः गोत्रहीनः ...।

पार्वती :- तिष्ठ रे दुर्बुद्धे। तं परमात्मानं निन्दता अपि त्वया सत्यमेव उक्तम्। स स्थाणुः स्वयम्भूः जगदाधारः जगदैककर्ता ब्रह्मदेवस्यापि कारणम् इति पण्डिताः आमनन्ति न त्वादृशाः जडधियः। अनादिरनन्तः स कथं कस्याः अपि प्रसूतिर्भवेत्। रे पण्डितंमन्य त्रिगुणातीतः अपि सन् स विश्वेऽस्मिन् रजसः आधिक्ये भवो भूत्वा उत्पत्तिं करोति। तमोगुणस्याधिक्ये विश्वस्य संहारं करोति। सत्त्वगुणस्य च आधिक्ये मृडरूपेण विश्वं सुखयति। त्वया तु केवलं हरस्य बाह्यलक्षणानि एव दृष्टानि। परं परमार्थतः तस्य अविकारि आत्मरूपं त्वादृशानां कृते दुर्लभं दुर्निरीक्ष्यं च। गच्छ। इतःपरं न किमपि अन्यत् श्रोतुमिच्छामि। त्वादृशाः मन्दमतयः यत्किमपि जल्पन्तु परं दृढं मे तस्मिन् भावरसैकं चित्तम्।

बटु :- चित्तम्। भावरसः। हुँः। तेन तु मनोभवः एव भस्मीकृतः। सदैव तपसि रतस्य तस्य हरस्य मनः एव न भवेदिति मे मतिः। यदि नाम भवेत् तर्हि तदपि तपसा अश्मनः इव द्रोतुं स्रोतुं च अक्षमम्। अन्यच्च चञ्चलं मनः बुद्धिप्रभावात् दमितव्यं त्वादृशीभिः तपस्विनीभिः इति शास्त्रानुशासनम्।

पार्वती :- नाहं श्रोतुमिच्छामि ते प्रवचनम्। कायवाङ्मनोभिः मया स एव वाञ्छितः। तस्य प्रसादार्थमेव एतत् तपः। शास्त्राभ्यासजडः कथं त्वं जानीयाः मे मनोव्यथाः मनोनिग्रहं च।

बटु :- अहो मूढत्वम्। अहो अविवेकः। कथं स्त्रीरत्नं त्वादृशं तं भयावहरूपम् अकिञ्चनं विषदग्धकण्ठं नीलकण्ठं पिशाचपतिं वाञ्छति।

पार्वती :- अलम्। अलमनया निन्दया। (उच्चैः) विजये निवर्त्यताम् अयं जल्पकः बटुः।

बटु :- कुतो विजया।

पार्वती :- अहो विस्मृतमेव मया। विजया तु अत्र न वर्तते। रे अधम, अपसर। ब्रह्मचारी त्वम्। अत एव इतः गन्तुं शक्नोषि। अन्यथा ...।

बटु :- किमन्यथा।

पार्वती :- तपःसामर्थ्येन मे त्वां भस्मीभूतम् अकरिष्यम्। गच्छ। सत्वरं गच्छ। न सहे गुरुनिन्दाम्। यः पूज्यान् अपभाषते न केवलं स एव पापभाक् भवति

अपि तु तस्मात् अपभाषकात् यः गुरुनिन्दां शृणोति सोऽपि पापभाक् भवति। अपेहि। पश्य। पिहितौ मे कर्णौ। नाहं किमपि शृणोमि। मम प्राणवल्लभं हृदयेश्वरं महेश्वरम् एव चिन्तयामि।

(पार्वती नेत्रे निमील्य आसने उपविशति। बटुः अन्तर्हितः। पार्वती गायति।)

स्मरारे पुरारे प्रभो नीलकण्ठ ।
वृतस्त्वं मया शर्व देवाधिदेव ।।
हृदम्भोजकोशान्तरं सन्निविष्ट ।
त्वदीयः प्रसादोऽस्तु मे स्वमिनाथ ।।१।।
शशाङ्कार्धमौले महेशान शूलिन् ।
हृदिस्थं ममेदं तु शूलं हरस्व ।।
त्वमेको मनोव्यापकः प्राणनाथ ।
प्रसीद प्रसीद प्रभो पूर्णरूप ।।२।।
यथा चातको याचते कृष्णमेघम् ।
तथायं जनो याचते त्वां भवेशम् ।।
प्रभो प्रीतिवृष्ट्या कृतार्थां कुरुष्व ।
तपस्यन्यथा तुच्छ देहं त्यजेयम् ।।३।।

(गायनात् ऊर्ध्वं बटुः शिवरूपेण अवतरति।)

बटु :- हे गिरिजे, अपर्णे ...।

पार्वती :- (बटुम् अदृष्ट्वा) अये कथं स एव बटुः पुनरपि माम् आह्वयति। रे गुरुनिन्दक कथं त्वम् अधुनापि अत्रैव तिष्ठसि।

बटु :- उमे अहं सर्वदा सर्वत्र तिष्ठमि। पश्य। उमाकान्तोऽहम्। निर्जितोऽहम् ते तपसा। पश्य। एहि।

पार्वती :- (नेत्रे उन्मील्य शिवं दृष्ट्वा धावन्तीव शिवसमीपं गच्छति।) किम्। किमहं पश्यामि। कुत्र स बटुः। किमेतत् मायाजालम्।

बटु :- हृदयेश्वरि अन्तर्हितः स बटुः। शिवोऽहम्। तपसा प्रीत्या च विनिर्जितः। दासोऽस्मि ते संवृत्तः।

पार्वती :- प्राणनाथ, कथमिदम् उच्यते। अहमेव खलु दासीभूतास्मि। त्रैलोक्यनाथस्य दासी।

बटु :- न दासी। परं प्राणवल्लभा स्वामिनी। एहि प्रिये। पितुस्ते सकाशं गच्छावः। एष गृह्णमि ते हस्तं सौभगत्वाय। एहि।

(गच्छतः। आकाशात् पुष्पवृष्टिं कृत्वा गायन्ति देवाः।)

शिवमङ्गले साधुवादः ।।
फलोदयोऽयं तपसश्च प्रीतेः ।
उमाजितोऽयं विषनीलकण्ठः ।।
नगाधिराजः श्वशुरश्च जातः ।
त्रिलोकनाथस्य शिवस्य शम्भोः ।।१।।
शिवमङ्गले साधुवादः ।।
महायशस्को नु वरो महेशः ।
वधूश्च गौरी हिमराजकन्या ।।
शिवस्य शक्तेश्च समागमोऽयं ।
लोके सदा मङ्गलमातनोतु ।।२।।
शिवमङ्गले साधुवादः ।।

– इति लेखनसीमा –

तपः फलोदयः नाटकस्य प्रथमः प्रयोगः

दिनांक : ०३-०१-२००२

भरत नाट्य संशोधन मन्दिरम्, पुण्यपत्तने

अभिनेतारः

सूत्रधार : अमोघ धामणकर

नटी : निलिमा पुराणिक

पार्वती : स्मिता कुलकर्णी

विजया : मधुरा नाईक

शंकर : सन्दीप भातखण्डे

साहाय्यकाः

रङ्गभूषा : निशिकान्त उजवणे

प्रकाशयोजना : संजय तोडणकर

नेपथ्यम् : प्रसाद गोडसे

संगीतम् : निलिमा पुराणिक

संवादिनी : कमलाकांत गवस

वेषभूषा : चन्द्रशेखर वझे, निर्मल भातखण्डे, चन्द्रशेखर कुलकर्णी, अवधूत गोळे, विद्या वझे

रंगमञ्च साहाय्यम् : संजय कुलकर्णी, राम पाणकर

निर्मितिप्रमुखा : मुग्धा गोळे

दिग्दर्शनम् : प्रभाकर भातखण्डे

(महाराष्ट्र राज्य नाट्यस्पर्धायां संस्कृत विभागे महाराष्ट्र सेवा संघ, मुलुन्ड द्वारा निर्मितम् एतन्नाटकम् प्रथम पारितोषिकेण सम्मानितम्। तत्र सन्दीप भातखण्डे महोदयः अभिनयनैपुण्यार्थं रौप्यपदकेन पारितोषिकेण च सम्मानितः। तथैव निलिमा पुराणिक महोदया प्रशंसापत्रेण सम्मानिता।)

- ईशावास्यमिदम्। -

यो देवो विलसत्यलक्षितरदे हास्ये शिशूनां स्वयम् ।
यूनां स्वेदजले प्रसन्नचरिते त्यागे च यस्तिष्ठति ।।
वृद्धानां पलिते शिरोरुहभरे यस्तेजसा शोभते ।
एवं मानववृन्दगोचरतनुं शम्भुं नमामो वयम् ।।१।।
पुष्पाणां स्तबके तृणाङ्कुरदले वल्लीषु यश्चेष्टते ।
अम्भोधौ लहरीषु ताण्डवपदैरुग्रैश्च यो नृत्यति ।।
भूतानां किल जीवने त्रिभुवने यः सूत्रवद्वर्तते ।
तं शम्भुं गिरिजापतिं त्रिनयनं भक्त्या नमामो वयम् ।।२।।

(नान्द्यन्ते प्रविशति सूत्रधारः।)

सूत्रधार :- आर्ये इतस्तावत्।

नटी :- आर्य इयमस्मि। अपि समाप्तानि रङ्गमङ्गलानि।

सूत्रधार :- आम्। अधुना प्रवर्त्यतां पार्श्वसंगीतम्।

नटी :- तिष्ठतु आर्यः।

सूत्रधार :- कस्मात्।

नटी :- प्रायः शून्यमिव प्रेक्षागृहं दृश्यते। कुत्र गताः ते विदग्धमानसाः रसिकवराः ये नाट्यकुसुमं परितः मधुपानासक्ताः भ्रमराः इव गुञ्जन्ति। ये सहस्रकरैः नाट्यसेवकेभ्यः उपायनानि यच्छन्ति।

सूत्रधार :- आर्ये, गीर्वाणभाषायाम् एष नाट्यप्रयोगः। अतः ...।

नटी :- आर्य, संस्कृतभाषायां रुचिवर्धनार्थमेव अस्माभिः संस्कृतनाट्यप्रयोगाः विनामूल्यं प्रस्तूयन्ते। न धनापेक्षया। किन्तु यथा अहं पश्यामि तथा न केवलं संस्कृतभाषायां परं सर्वासु भाषासु यानि अभिजातानि नाटकानि प्रयुज्यन्ते तेषां सर्वेषां नाटकानां प्रेक्षकसंख्या ऊनीभूता। न केवलं नाटकानामेव ईदृशी अवस्था अपि तु अभिजातसंगीत-नृत्य-शिल्पकलानां तथैव कीर्तन-व्याख्यान-प्रवचनादीनामपि ईदृशी एव अवस्था वर्तते। अधुना जनेभ्यः रोचते यत्किमपि उच्छृंखलम् अभिरुचिहीनम् ...।

सूत्रधार :- तिष्ठ आर्ये। अलम्। अलमनेन उपालम्भेन। रसिकास्तु अस्माकं देवाः। पूजनीयाः। न निन्दनीयाः। अस्माभिरेव तेषां संतोषार्थम् अभिरुचिवर्धनार्थं किमपि करणीयम्।

नटी :- किं करणीयम्। कथं वा करणीयं यदि ते उपस्थिताः एव न भवन्ति। कस्मात् ईदृशी अवस्था प्राप्ता। कथं रसिकाः ऊनीभूताः। जगत्यस्मिन् प्रतिक्षणं बहवः बालकाः प्रसूयन्ते। लोकसंख्यायाः विस्फोटः जातः इति सर्वत्र श्रूयते। ते लोकाः कुत्र गच्छन्ति।

सूत्रधार :- ते लोकाः सततं वर्धमाने समाजे एव वर्तन्ते।

नटी :- तर्हि कथम् अत्र न दृश्यन्ते।अपि तेषु रसिकहृदयाः समाजप्रियाः वा न केऽपि वर्तन्ते।

सूत्रधार :- आर्ये, यत्सत्यं सर्वे मानवाः अधुना आत्मकेन्द्रिताः सम्भूताः। एकोऽहम्। एकलोऽहम्। जगतः ईश्वरोऽहम्। नास्ति मे केनापि कोऽपि सम्बन्धः इति सर्वैः मन्यते। सर्वे एते एतस्मिन् समाजे एव निवसन्ति। परं तेषां समाजशीलत्वं विलयं गतम्। परिणामतः सार्वजनीने जीवने तेषां मनः न रमते।

नटी :- आर्य, नाहमेतद् ऋतं मन्ये। कथमेतत् सम्भवति।

सूत्रधार :- न केवलं सम्भवति परं सम्भूतमेव। आर्ये यदि इच्छसि तर्हि स्वयमेव समक्षं पश्य।

नटी :- कुत्र।

सूत्रधार :- यत्रकुत्रापि। सर्वत्र। एतस्मिन् पार्श्वस्थे गृहे अपि सर्वं द्रक्ष्यसि। एहि। एहि मया सार्धम्।

नटी :- एषा आगतास्मि।

(निर्गतौ।)

(द्वितीयः प्रवेशः।)

(सर्वसामान्यं गृहम्। आसनमञ्चाः आसन्दाश्च दृश्यन्ते। लेखनाधारमञ्चे अनभिमुखः संगणकः दृश्यते। द्वारे घण्टिकाध्वनिः। गृहस्य अन्तर्भागतः गन्धाली प्रविशति। ततः प्रविशति कार्यालयात् आगतः उमेशः।
स पादत्राणे अपाकृत्य संगणकस्य सम्मुखम् आसन्दे उपविशति।संगणकं प्रचालयति।)

उमेश :- गन्धालि, चायं मे देहि।

गन्धाली :- (अन्तर्भागतः) क्षणमात्रं तिष्ठतु भवान्। चायः एव परिक्लृप्यते। अपि श्रुतं भवता।

उमेश :- हुम्।

गन्धाली :- अद्य प्रभाते चिन्मयस्य शालायाः भवनं संन्यपतत्।

उमेश :- हुम्।

गन्धाली :- चत्वारः विद्यार्थिनः क्षतग्रस्ताः।

उमेश :- हुम्।

गन्धाली :- (चायपात्राभ्यां सह प्रविश्य) गृह्णातु भवान्। (उमेशः संगणके एव दत्तदृष्टिः चायपात्रं गृहीत्वा चायं पातुं प्रारभते।) अपि श्रुतम्।

उमेश :- हुम्।

गन्धाली :- किं श्रुतम्।

उमेश :- त्वया किमुक्तम्।

गन्धाली :- अद्य चिन्मयस्य शालायाः भवनम् अकस्मादेव संन्यपतत्। तत्र चत्वारः विद्यार्थिनः क्षतग्रस्ताः। एकश्च मृतः।

उमेश :- हुम्।

गन्धाली :- (सकोपम्) किं हुम् हुम् इति हुङ्करोति भवान्। अपि उन्मत्ता अहम् यद् एकाकिनी एव प्रलपामि।

उमेश :- न मया तथा उक्तम्। भण। किं वक्तुकामासि।

गन्धाली :- अद्य चिन्मयस्य शालायाः भवनम् अकस्मादेव पतितम्।

उमेश :- पततु नाम। न तत्र मम किमपि हीयते।

गन्धाली :- भोः सा चिन्मयस्य पाठशाला।

उमेश :- भवेत्।

गन्धाली :- कथं भवेदिति भणति भवान्। स तत्र अधीते। शालागृहं पतितम्। यदि अध्ययनार्थं भवनमेव न भवेत् तर्हि ...।

उमेश :- तर्हि शालाप्रमुखैः नूतनं शालागृहं निर्मातव्यम्।

गन्धाली :- परं यदि नूतनभवननिर्माणे शालायाः सामर्थ्यं न भवेत् तर्हि ...।

उमेश :- कथं न भविष्यति। चिन्मयः तत्र विनामूल्यम् अध्ययनं न करोति। प्रतिवर्षं सहस्त्रमितं शुल्कं ददामि।

गन्धाली :- ददातु नाम। परं तत्र चत्वारः विद्यार्थिनः क्षतग्रस्ताः। एकश्च मृतः।

उमेश :- म्रियतां नाम।

गन्धाली :- अहह। कथं भवान् ईदृशम् अतिकठोरं वदति।

उमेश :- नात्र कापि कठोरता। कथय। को मे सम्बन्धः तैः विद्यार्थिभिः।

गन्धाली :- कथम्। अपि कोऽपि सम्बन्धः नास्ति। ते चिन्मयस्य सहाध्यायिनः। सतीर्थाः।

उमेश :- पश्य। अस्मिन् जगति न कोऽपि लाभः ईदृशैः सम्बन्धैः। वृथैव मानवः सर्वैः सह सम्बन्धान् प्रस्थापयति। वस्तुतः स तु एकाकी एव जीवति। अतः स एकलः एव जीवितुम् अर्हति।

गन्धाली :- भर्तः वयं समाजे जीवामः।

उमेश :- किं मे समाजेन। अहं मम श्रमैः धनार्जनं करोमि। एतद् मम गृहम्। मया क्रीतम्। मया अर्जितेन मम धनेन। न समाजेन दत्तम्। सर्वं धान्यादिकं वस्तुजातम् अपि ममैव धनेन क्रीणामि। पश्य एतानि वस्त्राण्यपि न समाजेन दत्तानि। धनमूलमेतज्जगत्। यदि धनं भवेत् तर्हि समाजस्य न काऽपि आवश्यकता वर्तते। न वा समाजसम्बन्धानाम् आवश्यकता वर्तते। पश्य। एष संगणकः सर्वान् प्रयोजनान् पूरयितुं समर्थः। यदि शर्करागुडतैलादिकं वाञ्छसि तर्हि एष संगणकः तद् आनेतुं समर्थः। दूरभाषपणनेन तत् साध्यम्। तदर्थम् आपणपर्यन्तं गमनस्य आवश्यकता एव न वर्तते। एष संगणकः वैश्विकसंगणकजालेन संयुतः। सर्वं ज्ञानम् अस्मिन् संगृहीतम्। यः कोऽपि यत्किमपि अध्येतुमिच्छति तत् सर्वम् अनेन संगणकेन पाठ्यते। तर्हि का तत्र आवश्यकता शालायाः वा शिक्षकस्य वा गुरुशिष्यसम्बन्धस्य वा।

गन्धाली :- तर्हि यथा भवान् भणति तथा न भवतः केनापि अन्येन सम्बन्धानाम् आवश्यकता।

उमेश :- आम्।

गन्धाली :- न मयापि।

उमेश :- आम्।

गन्धाली :- किम्। किमुक्तं भवता।

उमेश :- न हि। नहि। नास्ति मे तथा अभिप्रायः। सर्वे नियमाः सापवादाः। त्वं तु मे भार्या।

गन्धाली :- परं किं भार्यया।

उमेश :- भार्या तु भार्या एव भवति। सा अन्नं पचति। भाजनानि स्वच्छीकरोति। वस्त्राणि प्रक्षालयति। रतिं ददाति। पुत्रान् जनयति। (किमपि स्मृत्वा) पुत्रः। पुत्रः। कुत्रास्ति चिन्मयः।

गन्धाली :- कश्चिन्मयः।

उमेश :- मे पुत्रः।

गन्धाली :- किं तेन।

उमेश :- न किमपि। परं कुत्र गतः।

गन्धाली :- कः सम्बन्धः।

उमेश :- स मे पुत्रः।

गन्धाली :- अपि अधुना स्मृतं भवता।

उमेश :- किम्।

गन्धाली :- भवतः अन्येन केनापि पितापुत्रसम्बन्धः वर्तते इति।

उमेश :- (सक्रोधम्) अहो अविनयः। प्रतिक्षणं प्रत्युत्तरं ददासि।

(द्वारे घण्टिकाध्वनिः)

गन्धाली :- तिष्ठतु भवान्। मन्ये चिन्मयः आगतः। (द्वारम् उद्घाटयति।) (प्रविशति दशवर्षदेशीयः चिन्मयः। तस्य हस्ते कन्दुकः। तस्य वस्त्राणि मलिनानि। पितुर्भीत्या स गृहस्य अन्तर्भागं प्रति गन्तुम् आरभते।)

उमेश :- (उच्चैः) तिष्ठ। कुत्र गच्छसि।

चिन्मय :- हस्तपादं प्रक्षालयितुम्।

उमेश :- कुत्र ते पादत्राणे।

चिन्मय :- खण्डिते।

उमेश :- नवीने कस्मात् न क्रीते।

चिन्मय :- न क्रीते।

उमेश :- गन्धालि अपि त्वत्सविधे धनं नासीत्।

चिन्मय :- अस्ति। धनम् अस्ति। परम् ...।

उमेश :- परं किम्।

चिन्मय :- शालायाः दुर्घटनायाम् एकः विद्यार्थी मृतः। अतः शोकप्रदर्शनार्थं क्षतग्रस्तान् प्रति सहसंवेदनादर्शनार्थं च सर्वे आपणाः पिहिताः।

उमेश :- धिक्कष्टम्। यः कोऽपि विद्यार्थी मृतः। तस्य कृते सर्वे व्यवहाराः निरुद्धाः। भवतु। कथं मलिनीभूतं ते शरीरं वस्त्राणि च।

चिन्मय :- क्रीडितुं गतोऽहम्।

उमेश :- कुत्र।

चिन्मय :- क्रीडाङ्गणे।

उमेश :- केन सह।

चिन्मय :- रमेशेन।

उमेश :- नैकवारं मया आज्ञप्तोऽसि। न क्रीडाङ्गणे न वा तादृशैः मित्रैः सह क्रीडितव्यम् इति।

गन्धाली :- परं बालकानां कृते क्रीडा तु आवश्यकी एव। मित्राण्यपि आवश्यकानि। क्रीडया व्यायामः ...।

उमेश :- त्वं किमपि मा ब्रूहि। चिन्मय, यदि व्यायामं वाञ्छसि तर्हि गृहे एव योगासनानि कुरु। परं मित्रैः सह सम्पर्कः मास्तु। स तु अनावश्यकः। पश्य। अत्र संगणके बहुविधाः क्रीडाप्रकाराः वर्तन्ते। एहि। अत्र उपविश। त्वां दर्शयिष्यामि।

चिन्मय :- न स संगणकः मया सह क्रीडति। स कन्दुकेन क्रीडनं न जानाति।

उमेश :- किमर्थं कन्दुकेन एव क्रीडितव्यम्। कन्दुकक्रीडा क्रीडाङ्गणे भवति। तत्र मृत्तिकायां तृणानि भवन्ति। तृणेषु बहुविधाः जन्तवः कीटकाः विषाणवः सर्पाः सरीसृपाः वा भवन्ति। मृत्तिकास्थितानां विषाणूनां संसर्गात् रोगाः प्रादुर्भवन्ति। तेन च मृत्युः ...।

चिन्मय :- तर्हि तात, यदि अहं कन्दुकेन न क्रीडामि तर्हि किम् अमरः भविष्यामि।

उमेश :- मूर्खवत् किमपि पृच्छसि। मरणं तु नैसर्गिकमेव ...।

चिन्मय :- परं तात, अस्माकं शिक्षकः वदति दीर्घजीवनार्थं सृष्ट्या सह सम्पर्कः आवश्यकः।

उमेश :- एवम् वा।

चिन्मय :- आम्। स कथयति। यत् चैतन्यम् अस्माकं शरीरे वर्तते तदेव विकसितेषु कुसुमेषु हसति। लता वृक्षेषु फुल्लति फलति च। सरीसृपेषु संचरति। सिंहव्याघ्रादिषु रवीति। नदीप्रपातेषु वहति। हरिणशावकेषु क्रीडति। कच्छपमत्स्येषु प्लवते। विहगेषु कूजति।

गन्धालि :- सत्यम्। चिन्मय सत्यम्। तदेव चैतन्यम् - सा एव चित्शक्तिः - स एव ईश्वरः सर्वेषु प्रणिषु प्राणिति। बालकैः सह क्रीडति। श्रमिकैः सह श्रमं करोति। गायकैः सह गायति। दुःखितैः सह विलपति। वृद्धैः सह वार्ता करोति। शिक्षकैः सह अध्यापनं करोति। विद्यार्थिभिश्च अध्ययनम्। सर्वेषु मानवेषु स एव ईश्वरः आत्मरूपेण निवसति। अतः सृष्ट्या प्राणिभिः पक्षिभिः सर्वैः मानवैः च सम्पर्केण चैतन्यस्य संवर्धनं भवति। प्राणानाम् अभिवृद्धिर्भवति। अनुभवविश्वं सुसमृद्धं भवति। सुखाभिवृद्धिर्भवति।

उमेश :- अहो तत्त्वज्ञानम्। अहो मूर्खत्वम्। सँ ते शिक्षकः मूर्खः। एषा च ते माता महामूर्खा। तेन च त्वमपि मूर्खशिरोमणिर्भविष्यसि। अस्य तत्त्वज्ञानस्य आधुनिके जीवने किमपि स्थानं न वर्तते। मा एतत् किमपि अवधारय। गच्छ अभ्यन्तरम्। हस्तपादं प्रक्षालय। (चिन्मयः अभ्यन्तरं गच्छति।)

गन्धाली :- भवादृशैः लोकैरेव समाजस्य ईदृशी अवस्था कृता।

उमेश :- मा ते अस्तु समाजस्य चिन्ता। गच्छ अभ्यन्तरम्। भोजनप्रबन्धं चिन्तय।

गन्धाली :- चिन्तयाम्येव। परं नैतद् मानवसदृशं चरितम्। परह्यः एव तत्र यादवमहोदयानां गृहे तेषां नवजातपुत्रस्य नामकरणविधिरासीत्। भवान् तत्र न गतः। न वा अहं गन्तुम् अनुज्ञाता।

उमेश :- किमस्माकं यादवैः। तेषां पुत्रः भवतु वा न वा भवतु। न अस्माकं तत्र कोऽपि सम्बन्धः। वृथा धनापव्ययः किमर्थम्।

गन्धाली :- हा धिक्। गच्छाम्येव। (गृहाभ्यन्तरं गन्तुम् आरभ्यते। पुनः परिवृत्य) अहो विस्मृतमेव मया।

उमेश :- किम्।

गन्धाली :- मध्याह्ने एव पिल्लेमहोदयानां वृद्धा पत्नी रुग्णालये दिवं गता। तस्याः कलेवरं रात्रौ दशवादनपर्यन्तं प्राप्स्यते। श्मशानयात्रा च सार्धदशवादने प्रयास्यति। भवता तत्र गन्तव्यम्।

उमेश :- किमर्थम्। के एते पिल्लेमहोदयाः।

गन्धाली :- अये पिल्लेमहोदयान् न जानाति भवान्। स तु अस्माकं पार्श्वस्थः। दशवर्षाणि यावत् अस्माकं पार्श्वे एव निवसति।

उमेश :- निवसतु नाम। नाहं श्मशानयात्रायां गन्तास्मि।

गन्धाली :- कस्मात्।

उमेश :- पिल्लेमहोदयस्य पत्नी मृता। न मे तत्र पिल्लेमहोदयेन - तस्य भार्यया - तस्याः महायात्रया वा किमपि कर्तव्यम्। वृथैव कालापव्ययः।

गन्धाली :- अहो नैष्ठुर्यम्। अहो समाजविमुखता। ईदृशेन व्यवहारेण यदा भवान् ...।

उमेश :- अलं चिन्तया। यदा अहं मरिष्यामि तदा नगरपालिकायाः सेवकान् ...।

गन्धाली :- प्रतिहतम् अमङ्गलम्। मा। मा भवान् ईदृशं किमपि वदतु। समाजे निवसन् अपि भवान् समाजविमुखः इव कथमाचरितुं शक्नोति। यदि भवान् इतरेषां जनानां सुखदुःखेषु सहभागी न भविष्यति तर्हि ...।

उमेश :- तर्हि इतरेजनाः अपि मम सुखदुःखेषु सहभागिनः न भविष्यन्ति। किं तत्र हीयेत।

गन्धाली :- भोः सुखं विभक्तं द्विगुणं भवति। दुःखं च विभक्तम् अर्धं भवति इति न श्रुतं भवता। अपि च सामाजिकं विचारं - सामाजिकं सहास्तित्वं -सामाजिकं कर्तव्यं कथं विस्मरति भवान्।

उमेश :- अयि भोः। सुखं वा दुःखं वा व्यक्तिगतमेव भवति। व्यक्तिगतं च भवितुम् अर्हति। समाजस्य सुखदुःखैः न मे किमपि कर्तव्यम्। न वा मम सुखदुःखैः समाजस्य किमपि कर्तव्यम्। गच्छ अधुना। भोजनं कर्तुमिच्छामि। पाककर्तव्यं कुरु। (द्वारे घण्टिकाध्वनिः।) गच्छ। पाकं कुरु। अहं पश्यामि कोऽत्र अस्मिन् समये संप्राप्तः इति।(गन्धाली अभ्यन्तरं प्रविशति। द्वारे पुनरपि घण्टिकाध्वनिः।) कः कोऽत्र भोः।

प्रकाश :- अहं प्रकाशः।

उमेश :- किं वाञ्छति भवान्।

प्रकाश :- द्वारमुद्घाटयतु भवान्।

उमेश :- किमर्थम्।

प्रकाश :- अस्ति किमपि प्रष्टव्यम्।

उमेश :- पृच्छतु भवान्।

प्रकाश :- द्वारमुद्घाटयतु भवान्। समक्षमेव प्रष्टव्यम्।
(उमेशः द्वारमुद्घाटयति। प्रविशति प्रकाशः।)

उमेश :- को भवान्। कस्मादत्र आगतः।

प्रकाश :- अहं प्रकाशः।

उमेश :- कथम् अन्धकारे प्रकाशः आगतः।

प्रकाश :- तदेव वक्तुकामोऽस्मि।

उमेश :- सत्वरं वदतु भवान्। मत्सविधे समयः नास्ति।

प्रकाश :- अस्ति कृष्णकुञ्ज इति उपनगरे काऽपि गोशाला। तत्र वृद्धानां गवां शुश्रूषा परिपालनं च क्रियते। तदर्थं धनं याचितुं समागतोऽस्मि। अस्मिन् विभागे बहुभिः सज्जनैः साहाय्यं कृतम्। भवानपि करोतु।

उमेश :- सत्वरं - सत्वरं निर्गच्छतु भवान्।न मे कोऽपि सम्बन्धः गोभिः सह।

प्रकाश :- भोः धर्मकार्यार्थमेतत्।

उमेश :- जानाम्यहं धर्मम् अधर्मम् च। त्वत्तः धर्मोपदेशं तमपि रात्रिसमये श्रोतुं न इच्छामि। कपर्दिकाम् एकामपि न दास्यामि। सत्वरं निर्गच्छ।

प्रकाश :- गमिष्यामि। गमिष्यामि। न ददातु भवान् धनम्। परं जलं ददातु। पिपासितोऽस्मि।

उमेश :- (अन्तर्भागम् उपलक्ष्य) आर्ये ऽऽ ..।

प्रकाश :- तर्हि न एकलः भवान्। (झटिति गृहस्य अन्तर्भागं प्रति गत्वा द्वारं पिधत्ते। भस्त्रिकायाः छुरिकां निष्कास्य।) तिष्ठ। न जलमावश्यकम्।

उमेश :- भोः किमेतत्।

प्रकाश :- (छुरिकया उमेशं संतर्ज्य) तत् पश्चात् कथयामि। प्रथमं भार्यायै कथय।

उमेश :- किम्।

प्रकाश :- अकारणमेव सा आहूता इति।

उमेश :- परम् ...।

प्रकाश :- कथय। अन्यथा अनया छुरिकया शतखण्डं त्वां करोमि।

उमेश :- क - क -कथयामि। (गन्धालीं प्रति। उच्चैः।) आर्ये अलमायासेन। अकारणमेव आहूता।

प्रकाश :- साधु।

उमेश :- भोः किमिदम् अनुष्ठीयते।
प्रकाश :- अहं धनं वाञ्छामि।
उमेश :- भोः गोशालायाः कृते बलात्कारेण धनं याच्यते। एषोऽधर्मः।
प्रकाश :- का गोशाला। को वा धर्मः। अहं मत्कृते एव धनं वाञ्छामि।
उमेश :- तर्हि चौरस्त्वम्।
प्रकाश :- यत् किमपि विजानीहि। परं धनं यच्छ।
उमेश :- न दास्यामि। (संगणकं प्रति गन्तुमारभ्यते।)
प्रकाश :- तिष्ठ। (छुरिकया उमेशं संतर्ज्य) अपि अतिचतुरम् आत्मानं मन्यसे। अत्र उपविश। तूष्णीं तिष्ठ। अन्यथा -(दूरध्वनिसंदेशवाहकं तन्तुं तथैव संगणकजालरज्जुं भिनत्ति।) अधुना समाप्तस्ते बाह्यविश्वेन सम्पर्कः। देहि। धनं देहि।
उमेश :- यद्यपि त्वया प्रणष्टः संगणकः तथापि तद् द्वारं तु ...।
प्रकाश :- तद् द्वारं तु मया आगमनसमये एव पिनद्धम्। यदि वाञ्छसि तर्हि उद्घाटयामि। गच्छ। बहिर्गत्वा आक्रोशं कुरु। तव साहाय्यार्थं न कोऽपि आगमिष्यति।
उमेश :- आगमिष्यति। पार्श्वस्थाः जनाः आगमिष्यन्ति।
प्रकाश :- असंभाव्यमेतत्। शशशृङ्गवत्। अधुना समाजे न कोऽपि कस्यापि साहाय्यं करोति। अपि वार्तापत्रेषु न पठितम्।
उमेश :- क - क - किम्।
प्रकाश :- परह्यः एव राजमार्गे -मध्यान्हे -जनसंमर्दे - काऽपि स्त्री केनापि दुरात्मना मृत्तिकातैलेन अभिषिच्य प्रज्वालिता। मारिता। तदा तस्याः साहाय्यं न केनापि कृतम्। स च नृशंसः विनायासं तत्रतः दूरं गतः। भीतभीताः जनाः तस्याः स्त्रियाः साहाय्यार्थं न आगताः। तत् किम् अधुना रात्रौ कोऽपि तव साहाय्यं करिष्यति। समाजे जनानां परस्परेण सम्बन्धः एव न भवति। तदेव मादृशानां महद्भाग्यम्। देहि। धनं देहि।
उमेश :- ध - ध - धनं तु अन्तर्भागे वर्तते।
गन्धाली :- (अन्तर्भागतः एव) नाथ।

प्रकाश :- देहि। झटिति देहि। यत् किमपि वस्त्रकोशे वर्तते। (उमेशः वस्त्रकोशात् अत्यल्पं धनं निष्कास्य ददाति।) किम्। एतावदेव। अनेन धनेन किं सेत्स्यति। देहि तद् घटियन्त्रम्। अङ्गुलीयकमपि देहि। अन्यथा अनया छुरिकया अङ्गुलिं ते छेत्स्यामि। (उमेशः घटियन्त्रम् अङ्गुलीयकं च ददाति।) तं स्वर्णहारमपि देहि। (उमेशः स्वर्णहारं ददाति।) हॅं। नैतत् पर्याप्तम्। देहि तं भ्रमणध्वनिम्। (उमेशः तथा करोति।)

गन्धाली :- (अन्तर्भागतः एव) नाथ। सिद्धं भोजनम्। आगच्छतु भवान्।

प्रकाश :- धिक्कष्टम्। एषा स्त्री ...।

उमेश :- सा मां भोजनार्थम् आह्वयति।

प्रकाश :- तिष्ठ। मम गमनस्य पश्चात् द्वारम् उदघाटयितव्यम्।

उमेश :- परं भोजनम् ...।

प्रकाश :- नश्यतु तद् भोजनम्। अत्र पार्श्वस्थे गृहे कोऽपि दिवं गतः। अतः मया चिन्तितं निर्मनुष्यमेतद् गृहम् इति। सर्वे तत्र महायात्रायां गताः भवेयुरिति। हन्त। अस्थाने खलु मया तथा चिन्तितम्। रे गृहस्थ, पार्श्वस्थे एव गृहे यदा मृत्युः सञ्चरति तदा त्वं सुखेन भोजनं करोषि। धिक् त्वाम्।

गन्धाली :- कथं न आगच्छति भवान्। सत्वरम् आगच्छतु।

प्रकाश :- धिक्कष्टम्। अधिकं धनमावश्यकम्। देहि। अधिकं धनं देहि।

उमेश :- धनं तु तत्र अन्तर्गृहे वर्तते। अपि द्वारम् उदघाटयानि।

प्रकाश :- तिष्ठ।

गन्धाली :- भोः किमर्थं द्वारं पिहितम्। अपि स्वस्थो भवान्।

प्रकाश :- अपि दृष्टम्। न कोऽपि तव साहाय्यार्थम् आगमिष्यति। भार्यां विना।

उमेश :- अपि द्वारम् उदघाटयानि।

प्रकाश :- तिष्ठ। एषा ते भार्या अत्र आगत्य ...। भवतु। दृष्टः मार्गः। त्वम् अत्रैव उपविश। अहं द्वारम् उदघाटयामि।यदा ते भार्या अत्र आगमिष्यति तदा तस्यै अहं तव मित्रम् अस्मि इति वक्तव्यम्। अपि भणिष्यसि।

उमेश :- आम्। मित्रम्। परं किं ते नाम।

प्रकाश :- प्रकाशः इति भण।

उमेश :- आम्।

प्रकाश :- तथैव एतस्मै मे मित्राय दशसहस्त्ररुप्यकाणि देहि इत्यपि ताम् आज्ञापय।
उमेश :- किमर्थम्।
गन्धाली :- (अन्तर्भागतः एव द्वारं खटखटायते।) भोः द्वारम् उद्घाटयतु भवान्।
प्रकाश :- यथोक्तं तथा एव भणिष्यसि। यदि अन्यथा भणिष्यसि तर्हि ...।
उमेश :- तर्हि किम्।
प्रकाश :- तर्हि एषा छुरिका सुखेनैव ते उदरं प्रवेक्ष्यति। अपि ज्ञातम्।
उमेश :- आम्। ज्ञातम्।
प्रकाश :- एष द्वारमुद्घाटयामि। (द्वारमुद्घाट्य उमेशस्य समीपम् उपविशति।)
उमेश :- आर्ये एहि। एष प्रकाशः। मम मित्रम्।
गन्धाली :- नमो नमः।
प्रकाश :- नमस्ते।
गन्धाली :- भोः किमर्थं द्वारं पिहितम्।
उमेश :- एष कार्यालयात् कामपि गुप्तवार्तां कथयितुमत्र आगतः।
गन्धाली :- किम्। मत्तः अपि गोपनीया।
उमेश :- न तथा। परम् आर्ये, कार्यालयसम्बन्धिनी सा वार्ता।
गन्धाली :- भवतु। चायमानेष्यामि।
प्रकाश :- अलं प्रयासैः। असमयः अयं चायपानस्य। एष प्रस्थितोऽस्मि। न चायं वाञ्छामि. उमेश ...। (इङ्गितैः सूचयति।)
उमेश :- आर्ये एतन्ममित्रं दशसहस्त्ररुप्यकाणि सत्वरं वाञ्छति। एषा तस्य आकस्मिकी आवश्यकता। तद् देहि।
गन्धाली :- यद् भवान् आज्ञापयति। एषा आनेष्यामि। (गन्धाली अन्तर्गृहं गच्छति।)
प्रकाश :- साधु। सुष्ठु अभिनीतं त्वया। नटश्रेष्ठः इव शोभसे।
गन्धाली :- (धनेन सह प्रविश्य) एतद् धनम्। दशसहस्त्ररुप्यकाणि। (धनं उमेशाय ददाति। उमेशः तद् धनं प्रकाशाय ददाति। प्रकाशः तद् भस्त्रिकायां स्थापयति।)
प्रकाश :- (उत्थाय) धन्यवादाः। पुनर्मेलिष्यामः। (बहिर्द्वारमुद्घाट्य निर्गतः।)
उमेश :- हा। हतोऽस्मि। मुषितोऽस्मि। (आक्रोशति।)
गन्धाली :- भोः कथमाक्रोशति भवान्।
उमेश :- स तु चौरः।

चिन्मय :- (प्रविश्य) तात किमभवत्। कथम् आक्रोशति भवान्।

उमेश :- स चौरः धनं गृहीत्वा गतः। दशसहस्त्ररुप्यकाणि - अङ्गुलीयकं - स्वर्णहारं - घटियन्त्रं - भ्रमणध्वनिं गृहीत्वा गतः।

गन्धाली :- किं चौरः। न मित्रम्। तर्हि रक्षापुरुषेभ्यः दूरध्वनिं करोमि।

उमेश :- तेन दुरात्मना दूरध्वनियन्त्रणा संगणकश्च प्रथममेव ध्वस्तौ।

गन्धाली :- हन्त। कथं भवता प्रतीकारः न कृतः।

उमेश :- तस्य हस्ते छुरिका आसीत्।

गन्धाली :- तर्हि कथं न आक्रुष्टम्।

उमेश :- को लाभः। कः अत्र आगमिष्यति। न मे केनापि सम्बन्धः।

गन्धाली :- अत एव सर्वदा ब्रवीमि। सर्वे जनाः परस्परैः सम्बद्धाः भवन्तु। सामाजिकभावं विवर्धयन्तु। येन विपत्तौ परस्परसाहाय्यं भविष्यति इति। परं न कोऽपि शृणोति।

उमेश :- सत्यमार्ये। स्खलितं मया। क्षमस्व। (द्वारे घण्टिकाध्वनिः।)

गन्धाली :- चिन्मय पश्य।

उमेश :- मा। मा द्वारम् उद्घाटय। अन्यः चौरः भवेत्।

गन्धाली :- आगच्छतु। सुखम् आगच्छतु। नाहं बिभेमि। (द्वारम् उद्घाटयति। प्रकाशः म्लानमुखः प्रविशति।)

उमेश :- अये कथम्। त्वम् पुनरागतः। एष गृह्णामि त्वाम्। आर्ये गृहाण। गृहाण एतम्।

प्रकाश :- तिष्ठतु भवती। मया दृष्टपूर्वा भवती। अपि भवत्याः नाम गन्धाली इति।

गन्धाली :- आम्। कथं भवान् मां जानाति।

प्रकाश :- अपि भवती जयभारतमहाविद्यालये अध्यापनं करोति।

गन्धाली :- आम्। परं कस्मात् एतत् सर्वं पृच्छति भवान्। चौरो भूत्वापि कथमेषा विचारणा। किमन्यत् ग्रहीतुमत्र आगतः।

प्रकाश :- न किमपि। यत् चोरितं तत् सर्वं प्रतिदातुं प्रत्यागतोऽस्मि।

उमेश :- अहो आश्चर्यम्। देहि। देहि। (प्रकाशः घटियन्त्रादिकं सर्वं गन्धाल्यै प्रत्यर्पयति।)

प्रकाश :- भगिनि, क्षन्तव्यः अयं जनः। यदा मया अत्र भवती प्रथमं दृष्टा तदाप्रभृति अहं मनसि चिन्तयन् आसम्।

गन्धाली :- किमिव।

प्रकाश :- भवती कुत्रापि दृष्टपूर्वा इति। यदा अहम् एतद् धनं चोरयित्वा बहिर्गतः तदा स्मृतं मया।

गन्धाली :- किम्।

प्रकाश :- भवत्या रक्षितः मे पुत्रः इति।

गन्धाली :- कथमिव।

प्रकाश :- गतमासे दुर्घटनायां क्षतग्रस्तः मे एकमात्रः पुत्रः भवत्या रुग्णालयं प्रति नीतः। तस्य तत्र शुश्रूषा भवत्या कृता। तस्मै औषधोपचाराः प्रदत्ताः। तदर्थं च स्वीयं धनं व्ययीकृतम्।

गन्धाली :- आम्। स्मरामि। परं तत् तु मम कर्तव्यमेव आसीत्। मानवीयं कर्तव्यम्। ईश्वरदत्तं कर्तव्यम्।

प्रकाश :- परं मया अपकृतम्। भवत्याः गृहे एव चौर्यं कृतम्। क्षन्तव्यः अयं ममापराधः। क्षन्तव्या मे कृतघ्नता। (गन्धाल्याः पादयोः पतति।)

गन्धाली :- उत्तिष्ठ। बन्धो उत्तिष्ठ। क्षान्तोऽसि।

प्रकाश :- उपकृतोऽस्मि।

गन्धाली :- एवं सहृदयः अपि त्वं कथं चौर्यकर्मणि प्रवृत्तः।

प्रकाश :- भगिनि। स मे पुत्रः न अद्यापि स्वस्थः। तस्यैव शल्यक्रियार्थं पञ्चसहस्रमितं धनम् आवश्यकमासीत्। दरिद्रोऽहम्। सर्वेषां याचनां कृत्वापि न लब्धं तद् धनम्। अतः पुत्रस्य जीवनार्थं स्वीकृतः एष पापमार्गः। एतद् मे प्रथमम् अन्तिमं च चौर्यकर्म। न भवतु मे पुत्रस्य शल्यक्रिया। स सुखं यमालयं गच्छतु। परं न कदापि पापमीदृशमाचरिष्ये। (गन्तुमुद्युक्तः।)

उमेश :- न ते पुत्रः यमालयं गमिष्यति। तस्य शल्यक्रिया भविष्यति।

गन्धाली :- कथमिव।

उमेश :- अनेन धनेन।

गन्धाली :- अये कथमेतत् परिवर्तनम्।

उमेश :- आर्ये, यथा मे पुत्रः चिन्मयः जीवति तथैव जीवतु अस्य पुत्रः। अद्य मया ज्ञातम्। स ईश्वरः सर्वेषु मानवेषु क्षमा रूपेण, चैतन्यरूपेण, सद्भावनारूपेण च तिष्ठति।

गन्धाली :- आम्। स ईश्वरः सर्वेषां हृद्देशे तिष्ठति।

चिन्मय :- अम्ब, परम् अस्माकं शिक्षकः भणति स ईश्वरः चराचरसृष्टौ निवसति इति।

गन्धाली :- सत्यम्। जात स तु सर्वत्र तिष्ठति। अतः अस्माभिः समाजाभिमुखैः सृष्ट्यभिमुखैश्च भूत्वा वर्तितव्यम्। तस्य ईश्वरस्य अस्तित्वं सर्वत्र अनुभवितव्यम्।

उमेश :- आम्। तेनैव ईश्वरेण व्याप्तमिदं सर्वम्। तद् ईशचैतन्यं सर्वत्र मन्तव्यं श्रोतव्यं निदिध्यासितव्यं च।

गन्धाली :- आम् भर्तः। एष चौर्यकर्मणि प्रवृत्तः प्रकाशः पुनरपि सन्मार्गं प्राप्तः। जीविष्यति अस्य पुत्रः शल्यक्रियया। भवत्यपि महत्परिवर्तनं सञ्ज्ञातम्। ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत् इति भवता ज्ञातम् अनुभूतं च। इतःपरं किमन्यत् वाञ्छनीयम्।

उमेश :- आर्ये तथापि इदमस्तु भरतवाक्यम्।

(सर्वे गायन्ति।)

ईशावास्यमिदं सर्वं यत्किञ्च दृश्यते भुवि ।
एतच्चराचरं सृष्ट्वा स तस्मिन्स्तिष्ठति स्वयम् ।।
तमेव परमानन्दं ज्ञातुं विज्ञातुमव्ययम् ।
श्रोतुमभ्यसितुं वोऽस्तु प्रीतियुक्ता सदा मतिः ।।

– इति लेखनसीमा –

ईशावास्यमिदम् नाटकस्य प्रथमः प्रयोगः

दिनांक ०२-०१-२००१

भरत नाट्य संशोधन मन्दिरम्, पुण्यपत्तने

अभिनेतारः

सूत्रधार : अवधूत गोळे
नटी : मेधा दिवेकर
गंधाली : मानसी सोमण
उमेश : प्रसन्न सातवळेकर
चिन्मय : सुमेध जोशी
प्रकाश : वीरेश कांबळी

साहाय्यकाः

रङ्गभूषा : निशिकांत उजवणे
प्रकाशयोजना : आनंद केळकर
संवादिनी : श्रीकांत भागवत
गायनम् : मुग्धा गोळे, मेधा दिवेकर
नेपथ्यम् : चन्द्रशेखर कुलकर्णी, राम पाणकर
दिग्दर्शन साहाय्यम् :चन्द्रशेखर वझे
निर्मितिप्रमुखा : मुग्धा गोळे
दिग्दर्शनम् : मेधा दिवेकर
मार्गदर्शनम् : प्रभाकर भातखण्डे

(महाराष्ट्र राज्य नाट्यस्पर्धायां संस्कृत विभागे महाराष्ट्र सेवा संघ, मुलुन्ड द्वारा निर्मितम् एतन्नाटकम्।)

– देवादपि गरीयसी। –

(प्रथमः प्रवेशः)

नेपथ्ये :- नटेश्वराभिधानेन पूज्यते नटनर्तकैः
निर्माता विश्वरङ्गस्य शङ्करो जनशङ्करः।।१।।
ईशशक्तिर्महादेवी मानुषीं तनुमाश्रिता
पालयत्यात्मजान्नित्यं मातृरूपेण संस्थिता ।।२।।
बालकास्तु वयं मुग्धाः पितृभ्यां परिपालिताः
नताः स्मो मातरं देवीं पितरं च महेश्वरम् ।।३।।

(नान्द्यन्ते गायन्तौ प्रविशतः श्रीनिवासविश्वंभरौ।)

उभौ :- सत्यं ज्ञानमनन्तं नित्यमनाकाशं परमाकाशं
गोष्ठप्राङ्गणरिङ्गणलोलमनायासं परमायासम् ।।४।।
मायाकल्पितनानाकारमनाकारं भुवनाकारम्
क्ष्माया नाथमनाथं प्रणमत गोविन्दं परमानन्दम् ।।५।।
मृत्स्नामत्सीहेति यशोदाताडनशैशवसंत्रासम्
व्यादितवक्त्रालोकितलोकालोकचतुर्दशलोकालिम्।।६।।

श्रीनिवास :- तिष्ठ रे विश्वंभर। इत एहि। कथम् एषा यशोदा भगवन्तं श्रीकृष्णं ताडयति।

विश्वंभर :- केन कथितम्।

श्रीनिवास :- आचार्यैः।

विश्वंभर :- कुत्र।

श्रीनिवास :- शृणु। मृत्स्नामत्सीहेति यशोदाताडनशैशवसंत्रासम् ....

विश्वंभर :- अहो मुग्धत्वम्। भोः श्रीनिवास बाल्ये वयसि कदाचित् श्रीकृष्णः गोष्ठप्राङ्गणे लुटन् मुखेन चर्वणं करोति स्म। तदा तेन मृत्तिकैव खादिता इति मत्वा संत्रस्ता यशोदामाता कृतककोपेन बालकृष्णम् उक्तवती। मुखमुद्घाटय। अन्यथा ताडयिष्यामि - इति। तदानीं नटनाटकः श्रीहरिः भीतभीतः इव मुखम् उद्घाट्य तां अदर्शयत्। तत्र च यशोदया किं दृष्टम्।

श्रीनिवास :- किम्।

विश्वंभर :- न मृत्तिका परं चतुर्दशभुवनानि। सम्पूर्णम् विश्वम्।

श्रीनिवास :- अहो भाग्यं तस्याः यशोदायाः यया भगवतः मुखे विश्वरूपं दृष्टम्। परं कथं एतादृशं महान्तं विश्वरूपिणं भगवन्तम् अपि ताडयितुम् उद्युक्ता सा यशोदा।

विश्वंभर :- तत्तु यशोदायाः मातृवात्सल्यम्। भगवतश्च लीलाकैवल्यम्।

श्रीनिवास :- तथापि बालरूपः भगवान् अपि मातुः बिभेति इति तु सत्यम् एव।

विश्वंभर :- न बिभेति। सर्वथा स्निह्यति। बालकस्य कृते माता कदापि न भयकरी परं सर्वथा अभयकरी। सा तु मानुषीं तनुमाश्रिता महादेवी।

श्रीनिवास :- तर्हि कथम् ईदृशी देवता अपि कैश्चित् पुत्रैः निन्द्यते अपक्रियते वा।

विश्वंभर :- कुत्र।

श्रीनिवास :- ह्यः भिक्षार्थम् अहं कस्यापि गृहद्वारि स्थितः। तदा कोऽपि गृहस्थः गृहाभ्यन्तरे उच्चैः आक्रोशति स्म।

विश्वंभर :- एवम्।

श्रीनिवास :- आम्। न त्वं माता। त्वं तु वैरिणी। मदर्थे त्वया किं कृतम्। स्तनंधयं मां विहाय इन्द्रियलौल्यार्थं कोऽपि परपुरुषः त्वया समाश्रितः। त्वं तु वेश्याङ्गना। अधुना नष्टाश्रया शरीरवैकल्याच्च मां साहाय्यार्थं याचसे। अपेहि। - इति।

विश्वंभर :- ततस्ततः।

श्रीनिवास :- किं ततस्ततः।

विश्वंभर :- ततः त्वया किं कृतम् इति पृच्छामि।

श्रीनिवास :- तद् गृहं परित्यज्य अन्यत्र भिक्षाटनं कृतम्।

विश्वंभर :- अहो कर्तव्यमूढता। कथं स कुपुत्रः त्वया सम्यक् न उपदिष्टः। माता तु माता एव भवति। वेश्याङ्गनापि तस्याः अपत्यस्य कृते देवता एव भवति। तस्याः जीवनरसेनैव गर्भस्थः जीवः वर्धते। अमृतमयेन स्तन्येन सा अर्भकं पुष्णाति। असहायावस्थायां सा अर्भकं परिपालयति। अर्भकस्य मूत्रपूरिषोत्सर्गेण क्लिन्नायां शय्यायां स्वयं सुप्त्वा सा अर्भकम् अक्लिन्नायां शय्यायां स्वापयति। किं तत्सर्वं

विस्मर्तव्यं कन्यापुत्रैः। तया क्वचित् कृतानि सर्वाणि पातकानि तस्याः वात्सल्येन निर्धूतानि भवन्ति। अत एव आचार्यैः उक्तम्।

श्रीनिवास :- किम्।

विश्वंभर :- कुपुत्रो जायेत क्वचिदपि कुमाता न भवति - इति।

श्रीनिवास :- तर्हि स्खलितमेव मया। अधुनैव ग्रामं गत्वा तं कुपुत्रं निन्दित्वा एतत् सर्वं कथयिष्यामि। (गन्तुमुद्यतः।)

विश्वंभर :- तिष्ठ। तिष्ठ। एष ते द्वितीयः प्रमादः भविष्यति। श्रीनिवास क्रोधाविष्टोऽसि अधुना। संन्यासं स्वीकर्तुकामैः क्रोधः सर्वथा परित्याज्यः इति विस्मृतं किम्।

श्रीनिवास :- न हि। न हि।

विश्वंभर :- परमात्मनि स्थितेन संन्यासिना लोकोद्धारार्थमपि यत्किमपि क्रियते तत्सर्वं शान्तेन मनसा परसंतापं च अकृत्वा सद्धर्मसंस्थापनार्थाय एव करणीयम्। न अन्यथा।

श्रीनिवास :- आम्। सत्यम्।

विश्वंभर :- संन्यासिनस्तु आत्मकार्यार्थं कर्मैव न विद्यते। देहधारणार्थं यावत्केवलं अत्यावश्यकं तावदेव तस्य कर्म इति वदन्ति ज्ञातारः।

श्रीनिवास :- भोः अनेन स्मारितोऽस्मि। देहधर्मपरिपालनार्थं स्नानार्थं च नदीतीरं गतैः आचार्यैः कथं चिरायते।

विश्वंभर :- न चिरायते। पश्य। एते आगच्छन्ति आचार्याः।

शङ्कर :- (प्रविश्य) ॐ तत् सत्। ॐ तत् सत्।

(शङ्करः शिलाखण्डे उपविशति। तं प्रणम्य श्रीनिवासः विश्वंभरश्च शङ्करं परितः उपविशतः।)

शङ्कर :- अहो रमणीयम् एतद् परब्रह्मरूपम्। नभस्पृगिव एतद् गिरिशृङ्गम्। हिंस्त्रैः श्वापदैः व्यापृतम् एतद् वनम् जलचरैराकुला एषा नदी। एते सुरभिशीतलाः वाताः। पञ्चमहाभूतानाम् एतत् क्वचित् भयावहं क्वचिच्च रमणीयं रूपमालोक्य तेषां स्वामिनः परब्रह्मणः एव स्मरणं भवति। परं सम्यक् जानीतम्। सर्वमेतन्मायारूपं ब्रह्मणः। ब्रह्मैव सत्यम्। ब्रह्मैव सत्यम्।

श्रीनिवास :- परम् आचार्य, एतद् चर्मचक्षुभिः दृश्यमानं मायारूपं सत्यं मन्यमानाः सामान्याः जनाः एभिरेव रूपैः भीतभीताः भवन्ति।

शङ्कर :- तदर्थमेव वेदाध्ययनं विहितं शास्त्रकारैः गृहस्थानां कृतेऽपि। उपनिषदः एतन्मायाजालं दूरीकृत्य परब्रह्मणः सम्यक् ज्ञानम् उपदिशन्ति।

श्रीनिवास :- सामान्यानां गृहस्थानां कृतेऽपि -।

शङ्कर :- ॐ । तेषां कृतेऽपि उपनिषदां सम्यगध्ययनम् अत्यावश्यकम्। येन सन्मार्गात् पतनं न भवति। सर्वेषाम् आश्रमाणां संस्थितिस्तु गृहस्थाश्रमेण एव भवति। अत एव गृहस्थाश्रमं प्रवेष्टुकामं स्नातकम् उपदिशति तैत्तिरीयोपनिषद्। यथा सत्यं वद।

(उपनिषन्मन्त्राः श्रीनिवासेन विश्वंभरेण शङ्करेण च सममेव गीयन्ते।)

सर्वे :- धर्मं चर।
स्वाध्यायान्मा प्रमदः।
आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः।
सत्यान्न प्रमदितव्यम्।
धर्मान्न प्रमदितव्यम्।
कुशलान्न प्रमदितव्यम्।
भूत्यै न प्रमदितव्यम्।
स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।
देवपितृकार्याभ्यां न प्रमदितव्यम्।
मातृदेवो भव।

(शङ्करः पुनःपुनः मातृदेवो भव इत्येव जपति।)

शङ्कर :- मातृदेवो भव। मातृदेवो भव। मातृदेवो भव।

श्रीनिवास :- आचार्य कथं भवान् अग्रे किमपि न भणति।

शङ्कर :- भोः शान्तम्। स्मृतोऽस्मि मम मात्रा। एतत् शृणोमि तया शब्दायितम्। वत्स शङ्कर एहि। त्वां द्रष्टुकामास्मि। एहि। सत्वरम् एहि।- इति।

विश्वंभर :- कथम् आचार्यः सुदूरस्थायाः अपि मातुः शब्दान् शृणोति।

शङ्कर :- एष तु आत्मनः आत्मना संवादः। अद्य यदा स्नानार्थम् अहं नद्याः प्रवाहं प्रविष्टः तदा मया मम चरणसमीपे एव दृष्टः कश्चिन्नक्रः।

श्रीनिवास :- किं नक्रः।

शङ्कर :- आम्। नक्रः।

श्रीनिवास :- अपि भवान् न भीतः।

शङ्कर :- भीतिः। किमर्थम्।यथा अहं तथा सोऽपि परब्रह्मणः एव अंशभूतः जीवः एव। मानुषीवाग्विरहितः स नयनाभ्यां किमपि वक्तुकामःइव मां पश्यन्नेवातिष्ठत्।तदा मया ज्ञातः तस्य अभिप्रायः।

श्रीनिवास :- कीदृशः।

शङ्कर :- भोः युवां न जानीतः मम पूर्वाश्रमवृत्तान्तम्।

विश्वंभर :- न जानीवः।

शङ्कर :- संन्यासिना वयो वृत्तं कुलं गोत्रं किमपि नोच्चरणीयम्। तथापि शृणुतम्।

विश्वंभर :- अवहितौ स्वः।

शङ्कर :- परशुरामक्षेत्रे केरलप्रदेशे निवसन् शिवगुरुः मे पिता। सतीदेवी च मे माता। निपुत्रिकौ मे पितरौ भगवतः शिवस्य दीर्घकालपर्यन्तम् आराधनम् अकुरुताम्। तेन तपश्चरेण सुप्रसन्नः शिवः वरम् अयच्छत्। पुत्रस्ते भविष्यति। अल्पायुः परं विद्वान् अथवा दीर्घायुः सामान्यः। वृणीष्व - इति। तदा पित्रा अल्पायुर्विद्वान् इति उक्तम्। तथास्तु इत्युक्त्वा अन्तर्हितः भगवान् शिवः। तस्यैव प्रसादात् मम माता मां प्रसूतवती। ततश्च शङ्करः इति मे नामधेयम्।

विश्वंभर :- अहो निष्करुणता शिवस्य। कथं भवादृशाः आचार्याः अल्पजीविनः भवितुम् अर्हन्ति।

शङ्कर :- नात्र भगवान् शिवः दोषास्पदः। शरीरप्राप्तिः मृत्योरनन्तरं देहान्तरप्राप्तिरपि जीवस्य कर्मणः एव परिपाकः। कर्मफलानां भोगादेव कर्मणः क्षयः सम्भवति। अतः यावत्पर्यन्तं जन्मान्तरकृतानि मे कर्माणि विलयं न यास्यन्ति तावत् मया जीवितव्यम्। भवतु तज्जीवनम् अल्पकालीनं दीर्घकालीनं वा। व्यर्थमेव तद्विषयकं चिन्तनम्।

विश्वंभर :- अवितथं वदन्ति आचार्याः। अद्य वा अब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः। परं भवादृशैरङ्गीकृतं कार्यं यथा सम्पन्नं भवेत् तादृक् दीर्घमायुः-।

शङ्कर :- तिष्ठ। अलं चिन्तया। परमात्मा तद् अन्येन कारयिष्यति। अन्यच्च अहं धर्मकार्यं करोमीति अहङ्कारः अपि अज्ञानमूलकः। परमात्मनैव सर्वमेतत् क्रियते इति मनसि सम्यक् स्थापनीयम्। देहबुद्ध्या अहं परमात्मनः दासः। जीवबुद्ध्या अहं तस्यैव अंशात्मकः। आत्मबुद्ध्या च तद् परब्रह्मैवाहम् इति सम्यक् ज्ञात्वा ईशकार्ये धर्मकार्ये वा रमणीयम्। यावदेष जीवः अस्मिन् देहे विलसति तावद् देहानुसारि कर्तव्यं समाचरणीयम्।

विश्वंभर :- अहो प्रसङ्गवशात् प्रचलिते संभाषणेऽपि अल्पाक्षरैः पाठिताः आचार्यैः अस्मादृशाः अल्पबुद्धयः।

श्रीनिवास :- सत्यम्।

विश्वंभर :- आचार्य भवतः पूर्वाश्रमकालीनं वृत्तान्तं साकल्येन श्रोतुमिच्छावः। कथयतु भवान्।

शङ्कर :- ॐ। मम शैशवावस्थायां एव मे पितृचरणाः दिवं गताः। तदाप्रभृति मात्रा एव अहं लालितः पालितः संवर्धितश्च। अहमेव तस्याः जीवितसर्वस्वम् आसम्। पञ्चमे वयस्येव मे मौञ्जीबन्धनं सम्पन्नम्।

श्रीनिवास :- पञ्चमे वयसि।

शङ्कर :- आम्। ततश्च प्रारब्धं वेदवेदाङ्गानाम् अध्ययनम्। उपनिषद्विचारैः संस्कारितेन मया तदा एव चतुर्थाश्रमग्रहणस्य निश्चयः कृतः।

विश्वंभर :- कस्मात्। आचार्य सामान्यत्वेन अवाप्तगृहदारापत्यैः कृतश्रमैः परिणतवयोभिः संन्यासः स्वीक्रियते।

शङ्कर :- सत्यम्। परं यद् अहरेव विरजेत् तद् अहरेव प्रव्रजेत् इति शास्त्रवचनम्। न तत्र वयसः कोऽपि नियमः। अतः जीवितसाफल्यार्थं विनाविलम्बं संन्यासः स्वीकरणीयः इति मया चिन्तितम्। परं तदर्थं मातुः अनुमतिः अत्यावश्यकी आसीत्। अल्पायुरेवाहम् इति जानन्त्यापि तया अभिलषितं कृतपरिणयेन मया गार्हस्थं स्वीकरणीयम् इति।

विश्वंभर :- स्वाभाविकम् एतत्। सर्वाः मातरः इत्थमेव चिन्तयन्ति।

श्रीनिवास :- तत्तु स्नेहवशात्।

विश्वंभर :- श्रीनिवास न केवलं प्रेमवशात् एव। किन्तु प्रजातन्तुं मा व्यवच्छेत्सीः इति श्रुतीनाम् उपदेशः। यदि स एव परिपाल्यते मातृभिः तर्हि कस्तत्र तासां दोषः। भवतु। आचार्य तर्हि कथं भवता मातुरनुज्ञा प्राप्ता।

शङ्कर :- कथं प्राप्ता। कथयामि। (त्रयः अपि उत्तिष्ठन्ति।) आगच्छतम्। पश्यतम्। यथा एषा नदी अत्र प्रवहति तथैव मम ग्रामसमीपे गङ्गा प्रवहति। अथैकदा मात्रा सह नदीतीरं गतोऽहं स्नानार्थं जलं प्राविशम्। तत्र जले क्रीडतः मम चरणः तत्रागतेन नक्रेण सहसा गृहीतः। स च नक्रः मां गभीरे जले आकर्ष्टुं प्रारभत। बह्वायासैः अपि नक्रग्राहान्मुक्तिम् अलब्ध्वा मया परित्रायतां परित्रायताम् इति उच्चैः आक्रुष्टम्। तत्र समीपस्थः न कोऽपि त्राता आसीत्। मम आर्तम् आक्रोशं श्रुत्वा अतीव दुःखिता मे माता मया प्रार्थिता। हे अम्ब एषोऽहं म्रिये। अधुना यदि अनुमतिं दास्यसि तर्हि संन्यस्तं मया इति उक्त्वा मरिष्यामि येन मोक्षावाप्तिर्मे भविता इति। तदा पुत्रजीवितं प्रति हताशया तया तथास्तु इति उक्तम्। तस्मिन्नेव क्षणे मया स्वीकृतः संन्यासः संन्यस्तं मया इति उक्त्वा।

विश्वंभर :- ततस्ततः।

शङ्कर :- अक्षिणी निमील्य च प्रार्थितः जगन्नाथः। तस्मिन् अभ्यन्तरे दूरस्थाः केचन कैवर्तकाः मम आक्रोशं श्रुत्वा नौभिःसह समीपम् आगत्य नौदण्डैश्च नक्रं ताडयित्वा नक्रमुखान्माम् अमोचयन्। मोहम् उपगतं च माम् अर्धमृतावस्थायां नदीतीरं आनाययन्।

श्रीनिवास :- अहो भाग्यम् अस्माकम्।

शङ्कर :- नक्रग्राहान्मुक्तिस्तु ईश्वरेच्छा। मातुः अनुमत्या गृहीतः संन्यासः तु आपत्संन्यासः एव आसीत्। विधिपूर्वकस्य संन्यासग्रहणस्य कृते मया प्रारब्धं सद्गुरोरन्वेषणम्।

श्रीनिवास :- युक्तम् एव तत्।

शङ्कर :- तदर्थं च यदा अहं गृहत्यागार्थं सिद्धः तदा अश्रुपूर्णाकुलेक्षणा मे माता सगद्गदम् प्राह।

श्रीनिवास :- किम्।

शङ्कर :- वत्स शङ्कर, एकमात्रे मे पुत्रे त्वयि दूरं गते एकला एव अहं स्थास्यामि। तर्हि मम अन्तकाले को मह्यं सद्गतिं दास्यति - इति।

विश्वंभर :- युक्तमेव आह तत्रभवती। ततस्ततः।

शङ्कर :- तदा मया सा आश्वस्ता।

विश्वंभर :- कथमिव।

शङ्कर :- अम्ब अलं शोकेन। यत्र कुत्रापि अहं भवेयम्। परं यदा अन्तकाले मां स्मरिष्यसि तदा सत्वरं ते समीपम् उपतिष्ठेयम्। और्ध्वदैहिकं च ते कुर्याम् इति।

श्रीनिवास :- साधु कृतम् आचार्यैः।

शङ्कर :- श्रीनिवास अद्य स्नानसमये नदीजलेषु यदा तेन नक्रेण अहं दृष्टः तदा माता एव अश्रुपूर्णाभ्यां नयनाभ्यां मां पश्यति इति मे संवेदना अभवत्। तदाप्रभृति अहं शृणोमि मम मात्रा शब्दायितम्। हे शङ्कर शङ्कर इति।

विश्वंभर :- तर्हि किम् आचार्याः –।

शङ्कर :- ॐ । एष तस्याः अन्तकालः समुपस्थितः। अतः यथा मया पूर्वाश्रमे प्रतिज्ञातं तथा तस्याः समीपे समुपस्थातव्यम्। अनतिक्रमणीया मातुरिच्छा खलु संन्यासिनां कृतेऽपि।

विश्वंभर :- आचार्यैः सह आवामपि –।

शङ्कर :- न हि। न हि। यावदहं न प्रत्यागच्छेयम् तावद् युवाम् अत्रैव अस्मिन्स्थाने तिष्ठतम्। स्वाध्यायं च कुरुतम्। तस्मान्न प्रमदितव्यम्। मम प्रत्यागमनान्तरं विधिपूर्वकं संन्यासदीक्षां युवाभ्यां दास्यामि। एष प्रस्थितोऽस्मि। ॐ तत् सत्। ॐ तत् सत्। (निर्गतः।)

विश्वंभर :- भोः अन्तार्हिताः आचार्याः वनराजीषु।

श्रीनिवास :- अहो मातृभक्तिः आचार्याणाम्।

विश्वंभर :- सत्यम्। चित्ते वाचि क्रियायां च साधूनाम् एकरूपता इति लौकिकी गाथा अत्र स्मर्यते। एहि। आचार्याणां पुनरागमनं प्रतिपालयावः।

श्रीनिवास :- एहि।

उभौ :- सत्यं ज्ञानमनन्तं नित्यमनाकाशं परमाकाशं
गोष्ठप्राङ्गणरिङ्गणलोलमनायासं परमायासम् ।।
मायाकल्पितनानाकारमनाकारं भुवनाकारम्
क्ष्माया नाथमनाथं प्रणमत गोविन्दं परमानन्दम् ।।

(उभौ गायन्तौ निर्गच्छतः।)

(द्वितीयः प्रवेशः)

(कापि स्त्री सुप्ता इव दृश्यते। सा शङ्करस्य माता। मृता।)

शङ्कर :- हन्त। निमीलिते ते नेत्रे। अम्ब यथा त्वया ईप्सितं तथा मम अङ्कोपरि एव त्वया अन्तिमं निःश्वसितम्। मन्ये समाप्तं ते मर्त्यलोके निवसनम्। अहो विस्मृतः एव मया लोकाचारः। (गृहाभ्यन्तरं गत्वा गङ्गाजलकलशं आनयति।) ॐ तत् सत्। ॐ तत् सत्। (संप्रार्थयमानः इव।)

भगवति
गङ्गे त्रैलोक्यसारे सकलसुरवधूधौतविस्तीर्णतोये
पूर्णब्रह्मस्वरूपे हरिचरणरजोहारिणि स्वर्गमार्गे ।।
सकलकलुषभङ्गे स्वर्गसोपानसङ्गे
तरलतरतरङ्गे देवि गङ्गे प्रसीद ।। प्रसीद।।
(गङ्गाजलं मातुः मुखे समर्पयति।)

हे मातः वात्सल्यगङ्गे अवनितलं प्राप्ते देवि गङ्गाजलमिव पावनं ते जीवनं समाप्तिं गतम्। हे अम्ब त्वया एव मह्यं प्रदत्तम् एतज्जीवनम्। मुक्तिप्राप्तये आवश्यकं मानवजीवनम्। एतत् शरीरं त्वयैव प्रदत्तम् उपायनम्। तस्मादेव मे मोक्षमार्गः सम्भवति। उपकृतोऽस्मि। इतःपरं किमपि वक्तुं नास्ति मे सामर्थ्यम्। एष मे अन्तिमः प्रणामः। (इति तस्मिन् साष्टाङ्गं प्रणमति सति एव प्रविशति दूरतः एव आह्वयन् उन्निकृष्णः।)

उन्निकृष्ण :- सतीदेवि। भोः सतीदेवि। (शङ्करं दृष्ट्वा।) भोः किमेतत्। अब्रह्मण्यम्। अब्रह्मण्यम्। संन्यासिना न कस्यापि वन्दनं करणीयम्। स एव वन्द्यः सर्वैः। अतः एष मे प्रणामः। (प्रणमति।)

शङ्कर :- (निरीक्ष्य।) भोः उन्निकृष्णंभट्ट -

उन्निकृष्ण :- अहो आश्चर्यम्। को भवान्। कुत आगतः। कथं च माम् अभिजानाति।

शङ्कर :- भोः शङ्करोऽहम्। प्रतिवेशी अहं भवतः।

उन्निकृष्ण :- कथं शङ्करः। तेन तु चतुर्थाश्रमः स्वीकृतः। स्मरामि तस्य बालरूपम्। न त्वं तादृशः दृश्यसे।

शङ्कर :- न तत्सदृशः। परं स एव शङ्करोऽहम्। सत्यम्।

उन्निकृष्ण :- न विश्वसिमि। अस्तु। (गन्तुमुद्यतः पुनः परावृत्य भणति।) परं कथम् एषा सतीदेवि अत्रैव स्वपिति। मन्ये वृद्धावस्थायां व्याधिग्रस्ता बहुकालं यावत् पुत्रं प्रतीक्षमाणा एषा मूर्च्छिता।

शङ्कर :- नैषा मूर्च्छिता। न वा सुप्ता। अपि तु शाश्वतं प्रसुप्ता। मृता।

उन्निकृष्ण :- किम्। मृता।

शङ्कर :- आम्। पञ्चत्वं गता।

उन्निकृष्ण :- अहह। सतीदेवि शिवगुरोः पत्नि-

शङ्कर :- अधुना एव भोः वत्स शङ्कर इत्युक्त्वा तया नेत्रे निमीलिते। अन्तिमं च निःश्वसितम्। एषा मे माता। अत एव मया एतस्यै एष प्रणामः समर्पितः।

उन्निकृष्ण :- भोः संन्यासिन् शङ्करोऽस्मि शङ्करोऽस्मि इति वदता त्वया -

शङ्कर :- न केवलं वदामि। शङ्करः एव अहम्।

उन्निकृष्ण :- भवेः कदाचित्। परं शिवनामाभिधानेन त्वया अशिवम् आचरितम्।

शङ्कर :- कथमिव।

उन्निकृष्ण :- यदेषा स्त्री स्पृष्टा वन्दिता च । भोः संन्यासी तु न संभाषेत स्त्रिया सह। स्त्रियं कांचित् पूर्वदृष्टां च न स्मरेत्।

शङ्कर :- परं मृता एषा -

उन्निकृष्ण :- मृता वा जीविता वा परम् एषा स्त्री इति तु सत्यमेव।

शङ्कर :- कथं भवान् स्त्री स्त्री स्त्री इत्येव वदति। एषा मे जन्मदात्री।

उन्निकृष्ण :- तर्हि कस्तत्र भेदः। संन्यासिनः तु न माता न पिता न आप्तः न बन्धुर्वा भवति।

शङ्कर :- जानामि। परं कथं भवान् एतादृशे दुःखप्रदे प्रसङ्गेऽपि तर्ककर्कशं वदति।

उन्निकृष्ण :- कथं दुःखप्रदः इति। संन्यासी तु नाभिनन्देत् मरणं नाभिनन्देत् जीवितम् इति शास्त्रवचनम्। अनेन मातुः मरणेन यदि दुःखम् अनुभवसि तर्हि मन्ये एष ते छद्मसंन्यासः एव।

शङ्कर :- अलम् उपहासेन। भोः यस्य कस्यापि मरणं दुःखाय एव भवति प्राणिनां कृते। तत्रापि मातुः मरणम् -

उन्निकृष्ण :- परं संन्यासिनः तु सुखदुःखे लाभालाभौ जन्ममृत्यू सममेव भवतः। स तु तयोः परः एव भवति। अपरं च यथा महर्षिभिरुक्तं तथा अस्मिन् मर्त्यलोके प्राणिनां समागमः क्षणिकः एव भवति। यथा महोदधौ काष्ठं च काष्ठं च समेत्य व्यपेयातां न पुनर्मिलनाय -

शङ्कर :- जानामि। जानामि एतद् महर्षिवाक्यं तत्त्वज्ञानं च। परं मातुः पुत्रस्य च मेलनं न इतरेषां भूतमात्राणामिव। तयोर्मध्ये वर्तते भावबन्धः। मर्मबन्धः। अद्वितीयः सम्बन्धः। नाहं दुःखितः। न च अहं विलपामि। परं मातरं प्रति वर्तते पुत्रकर्तव्यम्।

उन्निकृष्ण :- कर्तव्यम्। कीदृशम्। संन्यासिनः तु न किमपि कर्तव्यं विद्यते।

शङ्कर :- परम् -

उन्निकृष्ण :- तिष्ठ। एते दृश्यन्ते अग्रहारप्रमुखाः रामचन्द्रभट्टाः। तान् आह्वयामि। रामचन्द्रभट्टाः भोः रामचन्द्रभट्टाः इत आगच्छन्तु भवन्तः। (शङ्करं प्रति।) अधुना पश्य। (रामचन्द्रः प्रविशति। उन्निकृष्णः रामचन्द्रं प्रणमति।)

रामचन्द्र :- एष आगतोऽस्मि। कथय। किं प्रष्टुकामोऽसि।

उन्निकृष्ण :- एषा शिवगुरोः विधवा सतीदेवी दिवं गता।

रामचन्द्र :- दिवं गता। (सतीदेवीं निरीक्ष्य) धिक्कष्टम्। न अस्याः कोऽपि सम्बन्धी आप्तः वा वर्तते। अतः ग्रामस्थैः कार्यम् अस्याः और्ध्वदैहिकम्।

उन्निकृष्ण :- सत्यम्।

रामचन्द्र :- तेन हि ममाज्ञया आहूयन्तां केचन जातिबान्धवाः ग्रामस्थाः। (उन्निकृष्णः गन्तुमुद्युक्तः।)

शङ्कर :- तिष्ठतु भवान्। ग्रामस्थाः आह्वातव्याः। परं श्मशानयात्रार्थम्। न पुनः और्ध्वदैहिकं कर्तुम्।

उन्निकृष्ण :- किम्। किमाह भवान्। भोः संन्यासिन् निराधारा एषा। न अस्याः कोऽपि आप्तः वर्तते।

शङ्कर :- वर्तते। अस्याः पुत्रः वर्तते।

रामचन्द्र :- न वर्तते। आसीत्। परं तेन तु बाल्ये वयसि एव संन्यासः स्वीकृतः।

शङ्कर :- स एव शङ्करोऽहम्। संन्यासी शङ्करः। अस्याः पुत्रः।

रामचन्द्र :- कथं पुत्र इति। संन्यासी तु न कस्यापि पुत्रः भवति। भोः न अयं लोकोऽस्ति संन्यासिनः। नैषा पृथिवी अपि।

शङ्कर :- अयि भोः जानामि। आत्मार्थे पृथिवीं त्यजेदिति ज्ञात्वा एव मया आत्मकल्याणार्थं बाल्यकाले ब्रह्मचर्यादेव स्वीकृतः संन्यासः। न अवशिष्टं मे अस्यां पृथिव्यां अस्मिन् लोके वा किमपि वाञ्छनीयं कामयितव्यं कर्तव्यम् वा येन कर्मबन्धापतितः पुनरावर्तिनः मर्त्याः इव पुनरपि जननं पुनरपि मरणं इति संसारचक्रे निबद्धो भवेयम्। मोक्षमार्गाच्च पतितो भवेयम्।

रामचन्द्र :- सम्यग् उक्तं त्वया। तर्हि अधुना निवर्तस्व अस्मात् ते हठात्।

शङ्कर :- नायं हठः। संन्यासधर्मादपि श्रेष्ठतरं पुत्रकर्तव्यम्। भूमेरपि गरीयसी माता इति यमधर्मपुत्रवचनं भवता श्रुतमेव स्यात्।

रामचन्द्र :- कथं न श्रुतं भवेत्। भगवद्भिः वेदव्यासैः इतिहासे आख्यातमेतत्।

शङ्कर :- तर्हि माता तु भूमेरपि गरीयसी देवता इति अनुमतम् एव भवता।

रामचन्द्र :- अहो ते वाक्पटुत्वम्। अहो ते वाक्पटुत्वम्। परं सम्यक् जानीहि एतैः शब्दजालैः शब्दच्छलेन च अहं धर्मविरुद्धं किमपि न अनुमंस्ये।

शङ्कर :- नात्र धर्मविरुद्धं किमपि। यद्यपि मया परित्यक्ता पृथिवी तथापि पृथिव्याः अपि गरीयसी देवता न विस्मृता उज्झिता वा। यत् पुत्रेण आचरणीयं तदेव अनुष्ठातुम् इच्छामि। अहम् अस्याः पुत्रः - एकमात्रम् अपत्यम्। अतः अहमेव अस्याः और्ध्वदैहिकम् अस्याः इच्छाम् अनुसृत्य करिष्ये।

रामचन्द्र :- कथं त्वं करिष्यसि। अहो अधर्मः। अहो अधर्मः। संन्यासिना लौकिकी क्रिया न कार्या। तादृशी धर्माज्ञा वर्तते।

शङ्कर :- मातुरिच्छापालनमपि धर्म्यम् एव। प्रतिज्ञापालनम् अपि धर्मः एव। संन्यासग्रहणात्पूर्वं मया प्रतिज्ञातं मातृदेवतायै -

रामचन्द्र :- यत् त्वया प्रतिज्ञातं यद् वा तव मात्रा आज्ञप्तं तेन न कोऽपि सम्बन्धः धर्मशास्त्राणाम्। धर्मशास्त्रं लोकधारणार्थं धर्मस्य सम्यक् पालनार्थं च निर्मितम् अस्माकं पूर्वजैः। अतः अनुल्लङ्घनीया शास्त्राज्ञा।

शङ्कर :- मयापि अधीतानि शास्त्राणि।

रामचन्द्र :- शास्त्राण्यधीत्यापि भवन्ति मूर्खाः। भोः शङ्कर न एतत् केवलं शास्त्रम्। परम् अस्माकं परम्परा लोकाचारः।

शङ्कर :- परं शास्त्रिणः शास्त्रेषु वा लोकाचारेषु वा अपवादाः भवन्ति एव।

रामचन्द्र :- तत् किं त्वम् आत्मानं महत्तमं मन्यसे येन त्वत्कृते शास्त्राणि अपि नामयितव्यानि। अथवा एषा ते माता कापि देवी देवता वा यस्याः आज्ञापालनार्थं सर्वे नियमाः विच्छेत्तव्याः। आश्रमधर्माश्च भङ्क्तव्याः।

शङ्कर :- क्षम्यताम्। नाहम् आत्मानं महान्तं मन्ये। परं मम मातरं तु देवीम् एव मन्ये। न केवलं मम माता एव परं सर्वाः मातरः तासाम् अपत्यानां कृते देवताः एव भवन्ति। अतः मातुराज्ञा शास्त्रेभ्यः अपि बलीयसी।

उन्निकृष्ण :- मातृगौरवं तु सर्वैरेव क्रियते। किन्तु एतत् ते वचनम् अश्रुतपूर्वं तर्कदुष्टं च।

शङ्कर :- कथं तर्कदुष्टम् इति। मातृदेवो भव इति उपनिषदः आज्ञापयन्ति। तथैव पुराणेष्वपि उक्तम्।

उन्निकृष्ण :- किम्।

शङ्कर :- या देवी सर्वभूतेषु मातृरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नम - - ।

रामचन्द्र :- तिष्ठ। सा तु जगज्जनन्याः प्रार्थना। न कस्याः अपि स्त्रियः।

शङ्कर :- भोः जगज्जननी महादेवी एव स्त्रीरूपं धृत्वा बालकानां कृते भूतले अवतरति। मर्त्यदेहिनां सर्वाणि दुःखानि अनुभूय जगत्कल्याणार्थम् अर्भकान् पालयति। कष्टमयं जीवनम् अनुभवति। किमेतत्कार्यं कस्याः अपि देवतायाः कार्यात् ऊनम् अवरं वा मन्यन्ते भवन्तः। देवतास्तु सर्वसुखसागरस्वरूपे स्वर्गे निवसन्ति। तासां दर्शनं कृपाप्रसादो वा दुर्लभः एव। परं मातृदेवता तु गृहे गृहे प्रत्यक्षीभूत्वा स्वदेहे नवमासपर्यन्तं धृत्वा मानवं प्रसूते। तस्याः मांसरक्तास्थिसारभूतं नवं देहं प्रसूते। देवेभ्यः अपि परम् एतत् कार्यम्। अतः माता तु देवादपि गरीयसि।

रामचन्द्र :- अहो भाषितम्। अहो भाषितम्। वयं सर्वम् एतत् जानीमः। अपत्यपालनं तु मातुः पुण्यकार्यम् एव। परं स तु स्त्रीणां देहधर्मः। न तेन ताः देवेभ्यः अपि परतराः भवन्ति।

शङ्कर :- यत्किमपि भवन्तः मन्यन्ताम्। परं बालकानां कृते तु माता देवेभ्यः अपि परतरा।

रामचन्द्र :- अस्तु। देवता अस्तु। देवताभ्यः अपि परतरा अस्तु। परं संन्यासग्रहणानन्तरं तथैव अधुना अस्याः मरणानन्तरं समाप्तस्ते अनया सम्बन्धः।

शङ्कर :- एष सम्बन्धः कदापि न नश्यति।

रामचन्द्र :- भोः संन्यासिनः तु न केनापि सम्बन्धः वर्तते। जगतः कृते तु मृतः एव सः। निरग्नेरनिकेतस्य तस्य न स्वाहाकारः न स्वधाकारः न विधिः लौकिकी क्रिया वा विद्यते। अतः त्वया अस्याः और्ध्वदैहिकं न करणीयम् इति धर्माज्ञा। शास्त्राज्ञा। मम आज्ञा च।

शङ्कर :- यदि मातृसेवाव्रतपालनाय - प्रतिज्ञापालनाय - मातुराज्ञापालनाय क्रियते चेत् - -

रामचन्द्र :- तर्हि -

शङ्कर :- तर्हि किम्।

रामचन्द्र :- तर्हि जातिबहिष्कृतो भविष्यसि।

शङ्कर :- यथा भवद्भ्यः रोचते। परम् एष मृतदेहः श्मशानपर्यन्तं नेतव्यः - -।

रामचन्द्र :- नय। स्वयमेव नय। न अत्र कस्यापि साहाय्यं लप्स्यसे। भोः छद्मसंन्यासिन् यथेच्छसि तथा कुरु। प्रेतायाः अस्याः देहं स्कन्धोपरि स्थापयित्वा अथवा खण्डनं कृत्वा श्मशानं नय। मन्त्रैर्विनैव दह। भोः उन्निकृष्णन् याहि। केनापि अस्य कुपुत्रस्य कुसंन्यासिनश्च साहाय्यं न करणीयम्। तथैव अस्याः श्मशानयात्रायां न समुपस्थातव्यम् इति मम आज्ञा उद्घोषणीया सर्वत्र।

उन्निकृष्ण :- यद् भवान् आज्ञापयति। (निर्गतः।)

रामचन्द्र :- भोः धर्मभ्रष्ट संन्यासपतित जातिबहिष्कृत एतद् आपतितं ते अधर्माचरणस्य फलम्। मातृभक्ताः एव वयम्। परं न त्वादृशाः अधर्माचारिणः। पापपङ्के निमग्नस्त्वम्। एष प्रस्थितोऽहम्। शिवहर। शिवहर। शिवहर। (निर्गतः।)

(शङ्करः किमपि वक्तुकामः इव तं कानिचित् पदानि अनुगच्छति। अत्राभ्यन्तरे पटान्ते श्रूयते उद्घोषणा।)

उन्निकृष्ण :- (पटान्ते) भोः जातिबान्धवाः शृणुत। शृणुत। एष शिवगुरोः कुपुत्रः मातृमरणसमये प्रत्यागतः यतिब्रुवः शङ्करः संन्यासधर्मात् पतितः मातुः

और्ध्वदैहिकं करोति। अस्य अधर्माचरणस्य कारणात् ब्राह्मणवराणां रामचन्द्रभट्टमहोदयानाम् आज्ञया स जातिबहिष्कृतः। एषा धर्माज्ञा। विजयतां धर्मः। विजयतां धर्मः।

शङ्कर :- (सोद्वेगम्) विजयतां धर्मः। विजयतां धर्मः। हन्त। अज्ञानिनः एते। न जानन्ति धर्माधर्मयोर्भेदम्। शास्त्रवचनानां सूक्ष्मत्वम्। अस्तु। क्षन्तव्याः एते। एतन्मे मातुः शवं सूदूरं श्मशानपर्यन्तं नेतुम् अशक्यम्। अतः अत्रैव गृहाङ्गणे अग्निसात् करिष्ये। एष एव इतःपरं जातिबान्धवानां धर्मः भविता। (मातरं प्रणम्य) हे मातः यथा त्वया ईप्सितं तथा एष ते संन्यासी पुत्रः तव अग्निसंस्कारान् करोति। त्वया वास्तव्येन पुनीते अस्मिन् एवं गृहाङ्गणे।

(मातुः मुखं वस्त्रेण आच्छादयति। तस्याः मृतदेहं शनैः शनैः प्रदक्षिणीकुर्वन् पठति।)

भूमिरापोऽनलो वायुस्तथा ह्याकाशमेव च।
शरीरस्थानि भूतानि गच्छन्तु स्वं स्वमालयम् ।।
कृतकार्यासि हे देवि जगत्यां देहधारिणि ।
मातः स्वर्गपथारूढे गच्छ देवि यथासुखम् ।।

(रङ्गमञ्चे प्रकाशः शनैः शनैः ऊनः भूत्वा अन्धकारः प्रसरति। तदा एव पटान्ते केनापि गीयते।)

विहाय स्वात्मीयं त्रिदिवनिलयं शोभनतरम् ।
भुवं प्राप्ता देवी मनुजतनुमास्थाय जननी ।।
अविश्रान्तं कार्येष्वपरिगणयन्ती निजसुखम् ।
अपत्यानां स्नेहादपरिमितदुःखानि सहते ।।१।।

तवाङ्के निःशङ्कं स्वपिति सुखतस्ते शिशुरयम् ।
तदानीमापत्तिः प्रभवति न च स्प्रष्टुमपि माम् ।।
पदाम्भोजस्थं ते शिशुमविरतं चञ्चलमतिम् ।
कटाक्षैः सुस्निग्धैः परमकृपया पाहि विकलम् ।।२।।

त्वयाज्ञप्तं मातः सकलमिव मे शास्त्रवचनम् ।
तवाशीर्वादो मे विविधसुखराशेर्वितरकः ।।
त्वदीयं हे मातश्चरणकमलं तीर्थनिवहः ।
त्वदीया सेवेयं भवति सुलभा मोक्षपदवी ।।३।।

– इति लेखनसीमा –

देवादपि गरीयसी नाटकस्य प्रथमः प्रयोगः
दिनांक ०७-०१-२००३
भरत नाट्य संशोधन मन्दिरम् पुण्यपत्तने

अभिनेतारः

विश्वम्भर	: भार्गव पटवर्धन
श्रीनिवास	: मन्दार नाईक
शङ्कराचार्य	: दीपेश कतिरा
उन्निकृष्णन्	: शिवराम अय्यर
रामचन्द्रभट्ट	: चन्द्रकान्त दढेकर

साहाय्यकाः

रङ्गभूषा	: निशिकान्त उजवणे
प्रकाशयोजना	: आनन्द केळकर
संगीतम् गायनम् च	: निलिमा पुराणिक
रङ्गमञ्च साहाय्यम्	: चन्द्रशेखर कुलकर्णी, हरिश तन्ना
वेषभूषा	: अवधूत गोळे, शिवराम अय्यर
निर्मितिप्रमुखा	: मुग्धा गोळे
दिग्दर्शनम्	: चन्द्रशेखर वझे
मार्गदर्शनम्	: प्रभाकर भातखण्डे

(महाराष्ट्र राज्य नाट्यस्पर्धायां संस्कृत विभागे महाराष्ट्र सेवा संघ मुलुन्ड द्वारा निर्मितम् एतन्नाटकम्। तत्र दीपेश कतिरा महोदयः अभिनयनैपुण्यार्थं रौप्यपदकेन पारितोषिकेण च सम्मानितः)

वञ्चते। परिवञ्चते।

(रङ्गमञ्चे मञ्चकद्वयं स्थापितम्। एकस्मिन् उपविष्टः माधवः ऐकाग्र्येण शृणोति आकाशवाण्यां प्रचलितां प्रार्थनाम्। अन्यस्मिन् मञ्चे सुप्ता लता शनैः शनैः उत्थाय अभ्यन्तरं प्रविशति। तस्याः निर्गमनं न ज्ञातं माधवेन।)

ॐ अंशेन प्राणान् ससर्ज स महादेवः।

ते वै प्राणाः प्रथमं व्यचरन् विदेहाः।।

ते ह देहान् शिश्रियुः प्रकीर्णाः।

ततो भूतान्यजायन्त पृथक् पृथक्।।

स वै तेभ्यः जीविताय मृत्यवे ददे।

मृत्युस्ताँश्चिक्षेप जाले जनिविनाशाह्वे।।

दण्डनाय तस्यैवं वञ्चकस्य मृत्योः।.

तत् स्वामिनं ह शङ्करं शरणं व्रजामः।।

ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।

(प्रार्थनायां प्रचलितायां एव पटान्ते श्रूयते भाजनानां पतनध्वनिः।)

माधव :- भोः किम् अभवत्। (मञ्चकं दृष्ट्वा) अये कुत्र गता एषा। लते अयि लते। कथं भाजनानि पतितानि। किं करोषि। (वृद्धः माधवः अभ्यन्तरं प्रविशति।)

(आकाशवाणी :- अनया प्रार्थनया एव समाप्तिं गतः अस्माकम् एष कार्यक्रमः। सायङ्काले सप्तवादने पुनरपि मेलिष्यामः।)

(ततः प्रचलति आकाशवाण्यां घर्घरध्वनिः। लतां हस्तेन गृहीत्वा प्रविशति माधवः।)

माधव :- शनैः। शनैः। भोः किमर्थं त्वम् अभ्यन्तरं गता। (आकाशवाणीयन्त्रं हस्तेन स्थगयति।)

लता :- (क्षीणस्वरेण) जलं पातुम्। अनेन व्याधिना अङ्गाङ्गं मे प्रज्वलिताग्नौ न्यस्तमिव दहति। अतः शान्त्यर्थं जलं पीतम्।

माधव :- किमर्थं मह्यं न उक्तवती। किमर्थं शय्यायाः उत्थिता। यदि मह्यम् अवदिष्यः तर्हि अहमेव जलम् अदास्यम्। एहि। शनैः। शनैः। आम्। एवमेव। अत्र अस्मिन् मञ्चके उपविश। (लता तथा कृत्वा हसति।) अये किमर्थं हससि। अनेन तव व्याधिना आकुलीकृतोऽहं भीतः इव। परं त्वं तु ...।

लता :- न तथा। जानेऽहं भवतः प्रीतिपूरितं व्याकुलहृदयम्। न तन्निमित्तं मम हास्यम्।

माधव :- तर्हि कथम्।

लता :- यथा भवान् मह्यं हस्तेन आधारं दत्वा बालिकाम् इव शनैः शनैः चालयति। उपवेशयति। तद् दृष्ट्वा मया हसितम्।

माधव :- एवं वा। लते सामान्यमेतत्। यथोक्तम्।

आधारस्तु प्रदातव्यः वृद्धाय विकलाय च।
अविकसितबालाय कर्तव्यं मनुजस्य तत्।।

लता :- नाहं बालिका।

माधव :- सत्यम्। परम् ...।

लता :- जानामि। विकला अहम्। अनेन व्याधिना ग्रस्ता ...।

माधव :- न ग्रस्ता। केवलं स्पृष्टा। भोः शरीरे रोगाः प्रादुर्भवन्ति एव। कालान्तरेण औषधसेवनेन शुश्रूषया च रोगाः शरीरात् विनिर्गच्छन्ति एव।

लता :- परं एष रोगः न विनिर्गमिष्यति।

माधव :- कः कथयति।

लता :- अहं कथयामि।

माधव :- (तस्याः मुखे हस्तं विन्यन्स्य) मा। मा एवम्। न त्वं वैद्या।

लता :- सत्यम्। नाहं भिषग्वरा। परं मम अन्तःकरणम् एवं वदति।

माधव :- किम्।

लता :- अधुना पर्याप्तम् आयुष्यम् अस्मिन् शरीरे। भोः जीवात्मन् एतत् शरीरं त्यक्त्वा गृहाण अन्यत् शरीरम् इति।

माधव :- लते अलं तत्त्वचिन्तनेन। चिन्तनं कुरु स्वास्थ्यस्य। औषधप्रयोगेण त्वं पुनरपि सत्वरं स्वस्था भविष्यसि एव। एष तु सामान्यः रक्तक्षयः।

लता :- भोः किमर्थम् एषा वञ्चना। नाहम् आत्मानं वञ्चयितुम् इच्छामि। मया ज्ञातम्।

माधव :- किं ज्ञातम्।

लता :- तस्मिन् दिने डॉक्टरव्यासमहोदयेन यत् ज्ञापितम्।

माधव :- किम्।

लता :- आः। एताः वेदनाः। यदहं महाव्याधिना ग्रस्ता इति। नैतादृशी अवस्था रक्तक्षयेण भवति। परम् एष रक्तस्य कर्करोगः। रक्तपरीक्षणानन्तरम् एव व्यासमहोदयेन यदुक्तं तत्कथम् अन्यथा भवेत्।

माधव :- परं कथं त्वया एतत् सर्वं ज्ञातम्।

लता :- मया श्रुतम्।

माधव :- कथम्। कदा।

लता :- तस्मिन् दिने व्यासमहोदयस्य रुग्णालये यदा द्वावपि युवां सम्भाषमाणौ आस्तां तदा मया पटान्तापवारितशरीरेण सर्वं श्रुतम्।

माधव :- अहो अनवधानम् आवयोः।

लता :- अलम् आत्मनिन्दया। यत् सत्यं तन्मया स्वीकृतं शान्तेन मनसा। परं कस्मात् भवता मम ईदृशी वञ्चना अद्यावधि कृता।

माधव :- प्रिये नैषा वञ्चना पापहेतुना कृता। सत्यं स्वीकर्तुं नासीन्मे धैर्यम्। तवापि धैर्यं न भवेत् इति मत्वा मया एवम् अनृतं कथितम्। (दूरध्वनिः श्रूयते।)

लता :- भोः उत्तिष्ठतु भवान्। दूरध्वनिं स्वीकरोतु। कदाचित् दीपकस्य भवेत्।

माधव :- (उत्थाय) स्वीकरोमि। हरिः ॐ। (श्रुत्वा) लते नैष तव पुत्रस्य दूरध्वनिः।

लता :- हन्त। आपादमस्तकं वेदनाः मां बाधन्ते। आः।

माधव :- हरिः ॐ। तस्य देयकस्य धनपूर्तिः मया परह्यः एव कृता। भवान् भवतः अभिलेखपत्रं सम्यक् पश्यतु। आम्। धन्यवादाः। (दूरध्वनियन्त्रं स्थापयति।)

लता :- कस्य दूरध्वनिः आसीत्।

माधव :- दूरध्वनिनिगमकार्यालयात् केनापि कृतः।

लता :- मया चिन्तितं दीपकस्य इति। कदाचित् अत्र आगमनार्थं प्रस्थितः भवेदिति। तेनैव दूरध्वनिः कृतः इति। कदा आगमिष्यति।

माधव :- न जाने। परं सत्वरम् आगमिष्यति।

लता :- परपरह्यः भवता दूरभाषेण तेन सह वार्ता कृता नु।

माधव :- आम्।

लता :- तदा तेन किम् उक्तम्।

माधव :- आगमिष्यामि इति।

लता :- साधु। दिष्ट्या वर्धते मे पुत्रः। स च आवयोः अतीव स्निह्यति। अपि भवता कथितं तस्मै।

माधव :- किम्।

लता :- यद् अहं दुःसाध्यकर्करोगेण ग्रस्तास्मि इति।

माधव :- आम्। अहं साग्रहं तस्मै उक्तवान्।

लता :- किम्।

माधव :- तव माता बहुदिनानि यावत् न जीविष्यति इति।

लता :- हुम्। तदानीं तेन किम् उक्तम्।

माधव :- आगमिष्यामि इति।

लता :- सुदूरदेशस्थः मे पुत्रकः। मरणात् पूर्वम् एकवारं द्रष्टुम् इच्छामि। आलिङ्गितुम् इच्छामि। आगच्छ रे पुत्रक।

माधव :- आगमिष्यति। अवश्यम् आगमिष्यति। (द्वारघण्टिकायाः ध्वनिः श्रूयते।) अये पुनरपि दूरध्वनिः। तिष्ठ रे दास्याःपुत्र। एष आगच्छामि। (दूरध्वनियन्त्रं गृहीत्वा) हरिः ॐ। कथं कोऽपि न वदति।

लता :- अयि भोः। द्वारघण्टिकायाः ध्वनिः एषः।

माधव :- हन्त। वञ्चितोऽस्मि।

लता :- आगतः। दीपकः आगतः। मम पुत्रकः आगतः।अहमेव द्वारम् उद्घाटयामि। (उत्थातुं यतते।) आः।

माधव :- मा। मा एवम्। मा उत्तिष्ठ। अहमेव उद्घाटयामि द्वारम्।

लता :- सत्वरम्। सत्वरं गच्छतु भवान्। पुत्रकः मे आगतः। आः। आः। एताः वेदनाः सोढुम् अक्षमा अहम्। शीघ्रम् ...।

माधव :- लते अपि विस्मृतं त्वया।

लता :- किम्।

माधव :- अहमपि हृदयरोगी अस्मि।

लता :- कथं विस्मरिष्यामि।

माधव :- अत एव मया सर्वाः क्रियाः शनैः शनैः क्रियन्ते। एष उद्घाटयामि द्वारम्। (पटान्तं गत्वा) भोः किं वाञ्छति भवान्। लते न तव पुत्रः। परं

कोऽपि विक्रेता दृश्यते। भोः गच्छ। न अहं किमपि क्रेतुम् इच्छामि। अपेहि। (द्वारं पिधत्ते।) (प्रविश्य) मूर्खाः। एते विक्रेतारः अपराह्णे वृद्धानां विश्रामसमये घण्टिकावादनं कृत्वा पीडयन्ति। दण्डनीयाः खलु एते।

लता :- शान्तम्। शान्तम्। अलं क्रोधेन। हृदयरोगी भवान्। नास्ति आवयोः सामर्थ्यं एतेषां दण्डनाय। सोढव्यम्। यथा असह्याः अपि इमाः वेदनाः अहं सहे तथा सोढव्यम्। अस्तु। तर्हि न आगतः दीपकः।

माधव :- न आगतः। न आगमिष्यति अपि।

लता :- किम्। किम् उक्तं भवता। न आगमिष्यति इति।

माधव :- आम्।

लता :- कथं भवान् एवम् अतिकठोरं वदति।

माधव :- प्रिये नैषा कठोरता। सत्यमेतत्। न स आगमिष्यति।

लता :- स आगमिष्यति। सत्वरम् आगमिष्यति इति सततं माम् आश्वासयन् भवान् कथम् अधुना एवं वदति।

माधव :- प्रिये क्षम्यताम् अयं जनः। तव ईदृशीम् आसन्नमरणावस्थां दृष्ट्वा तव स्वास्थ्यार्थम् एव मया असत्यं भणितम्।

लता :- कथमिव।

माधव :- परपरह्यः न तेन दूरध्वनिः कृतः। मया एव तावकीम् अवस्थां दीपकाय ज्ञापयितुं दूरध्वनिः कृतः। प्रार्थितश्च मया स त्वां द्रष्टुम् अत्र आगमनाय। परं तेन उक्तं तस्य तत्र अत्यावश्यकं कार्यं विद्यते इति। एतादृशस्य अल्पस्वल्पस्य कारणात् विदेशात् अत्र आगन्तुं तस्य समयः नास्ति। यदा त्वं मरिष्यसि तदा तव और्ध्वदैहिकार्थं स धनं प्रेषयिष्यति। इत्यपि तेन उक्तम्।

लता :- हन्त। धनं प्रेषयिष्यति।

माधव :- प्रिये एतत् श्रुत्वा ते अतीव दुःखं भविष्यति इति मत्वा एव मया असत्यं उक्तम्। वञ्चिता त्वं मया।

लता :- न भवता। परं मम पुत्रेण वञ्चिता। मयि जीवति सति न आगमिष्यति। न च मम मरणानन्तरमपि। अहो अकरुणता तस्य। वृथैव आवाभ्याम् आबाल्यात् तस्मिन् स्नेहवर्षः कृतः। लालितः। पालितः। पाठितः। प्रशिक्षणार्थं विदेशं प्रेषितः। यदल्पं धनम् अस्मत्सविधे आसीत् तत् सर्वं व्ययीकृत्य परदेशं प्रेषितः।

अधुना मम अन्तकालेऽपि स प्रत्यागन्तुं न इच्छति। अहो दुर्भाग्यम् आवयोः। (रोदिति।)

माधव :- लते अलं शोकेन। एष कलिप्रभावः। पुत्राः पितरौ नेच्छन्ति। मामकीनाः मामकीनाः इति प्रतिपालिताः आप्ताः स्वकीयाः हन्त परकीयाः भवन्ति। स्वदेशीयाः वैदेशिकाः भवन्ति। सोढव्यमेतत्। प्रिये गते शोकः न कर्तव्यः।

लता :- कथं न करणीयः। नवमासपर्यन्तम् अस्मिन् उदरे धृतः अस्मिन् अङ्के पालितः मम पुत्रकः इत्थं परिणतः। न अहं तस्मात् धनं वाञ्छामि। न च सेवां वाञ्छामि। केवलं वाञ्छामि एकवारं तम् आलिङ्गितुम्। तस्य परिपालनं कुर्वत्या मया न चिन्तितं आसीत् यत् अस्माकं कुलदीपकः दीपकः वार्धक्ये आधारः भविष्यति इति। भवान् एव मम दृढाधारः खलु। निरपेक्षबुद्ध्या वात्सल्येन तस्य पालनं कुर्वत्या मया आत्मवञ्चना कृता। अहो धिगिदम् आयुष्यम्। इतः परं न क्षणमपि जीवितुम् इच्छामि। एताः वेदनाः मां बाधन्ते। तासाम् अन्तः मम जीवितान्तेन एव भविष्यति इति जानन्ती अपि अहम् अधुना वेदनाः सोढुम् असमर्थास्मि। भवान् मह्यं विषं ददातु येनाहम् उपकृता भवेयम्। (रोदिति।)

माधव :- जानामि प्रिये। असह्या खलु ईदृशी अवस्था। परं मन्ये शरीरापेक्षया अपि मनः ते दूयते।

लता :- आम्। (दूरध्वनिः श्रूयते।)

माधव :- स्वीकरोमि। (दूरध्वनियन्त्रं गृहीत्वा) हरिः ॐ। नात्र कोऽपि राजदीपः। कतमं क्रमाङ्कं वाञ्छति भवती। (श्रुत्वा) क्षम्यताम्। नायं सम्यक् क्रमाङ्कः। (दूरध्वनियन्त्रं स्थापयति।) लते अतीव श्रान्ता क्लान्ता इव दृश्यसे। अधुना स्वपिहि।

लता :- इतः परं चिरविश्रामः एव करणीयः। भोः प्रिय। माधव।

माधव :- अये किं शृणोमि। प्रिय माधव इति। प्रिये कालः अतीतः तव अनेन अभिधानेन माम् आह्वयन्त्याः। कथय लते किं कुर्याम्।

लता :- देहि मे हस्तम्। तत्र तस्मिन् आसन्दे त्वया सह उपवेष्टुम् इच्छामि।

माधव :- तेन तव कष्टाः भविष्यन्ति।

लता :- भवन्तु नाम। परं यथा आवयोः विवाहमङ्गले वधूवरौ आवां परस्परसन्निधौ आसन्दयोः उपविष्टौ आस्व तथा उपवेष्टुम् इच्छामि।

माधव :- एहि। किम्। अद्यापि स्मरसि विवाहमङ्गलम्।

लता :- कथं न स्मरामि।

माधव :- (लताम् एकस्मिन् आसन्दे उपवेशयति।) उपविश।

लता :- त्वमपि अत्र उपविश। (माधवः अन्यस्मिन् आसन्दे उपविशति।) अधुना तव हस्तं मे हस्तयोः देहि।

माधव :- लते किम् एतत् प्रारब्धम्। न वधूवरौ आवाम्। परं दम्पती।

लता :- आम्। स्मरामि तान् दिवसान्। ये आवाभ्यां महाविद्यालये व्यतीताः। तत्र कृताः प्रीतिशपथाः। तदनन्तरं विवाहः। स प्रथमस्पर्शः। तद् दृढालिङ्गनम्।

माधव :- आम्। तत् सर्वं स्मृत्वा अधुना पुनरपि रोमाञ्चितः ते कायः।

लता :- तव अपि।

माधव :- आम्।

लता :- माधव। अपि करिष्यसि यद् अहं वाञ्छामि।

माधव :- अवश्यम्। कथय।

लता :- तर्हि क्षमां कुरु। दयां कुरु।

माधव :- क्षमा। किमर्थम्। न त्वया किमपि अपराद्धम्। तर्हि कस्मात् एषा क्षमायाचना।

लता :- कथयामि। प्रथमं वचनं मे देहि क्षमा कृता इति।

माधव :- प्रिये न सम्यक् अवगच्छामि।

लता :- यत् किमपि वक्तुकामास्मि तत् श्रुत्वा क्रोधाविष्टो भविष्यसि। अद्यावधि एषा ते प्रिया अहम् अप्रिया भवितास्मि।

माधव :- न भविता। वचनं ते ददामि। शपे मम कण्ठेन।

लता :- शृणु। यद्यपि त्वं मम प्रियतमः यद्यपि कायवाङ्मनोभिः त्वमेव पूजितः हृदि च स्थापितः तथापि न अहं पतिव्रता। मया वञ्चितोऽसि रे माधव। वञ्चितोसि।

माधव :- कथमिव।

लता :- मम पुत्रः दीपकः न आवयोः पुत्रः। न तव पुत्रः। न त्वं तस्य पिता। क्षम्यताम्। क्षम्यताम् एषा कुलकलङ्किनी। क्षम्यताम् एषा वञ्चना। एष घोरः अपराधः।

माधव :- तर्हि कस्तस्य पिता।

लता :- नोत्सहे वक्तुम्। तथापि कथयामि। विवाहानन्तरम् अष्टवर्षाणि यावत् आवयोः अपत्यसम्भवः न अभवत्। मातृपदाभिलाषिणी परम् अनपत्या अहम् अतीव दुःखिता आसम्। तस्मिन् अभ्यन्तरे कार्यवशात् त्वं मासद्वयं विदेशं गतः आसीः। तदा न शरीरसुखार्थम् अथवा इन्द्रियलौल्यार्थं परम् अपत्यप्राप्यर्थम् मया एकवारं प्रार्थितः अस्माकं तत्कालीनः प्रतिवेशी रघुनाथः। तस्यैव पुत्रः एष दीपकः। अज्ञात्वा एतत् सर्वं त्वया आत्मीयपुत्रवत् पालितः दीपकः। ईदृशं भयावहं पापं मया आचरितम्। एतां वञ्चनां न त्वं क्षन्तुम् अर्हसि। देहि। देहि मे विषम्। अथवा गलग्रहणेन मारय माम्। जारिणी अहम्। जारिणीऽऽ...। (रोदिति।)

माधव :- शान्तम्। शान्तं प्रिये।

लता :- कथम्। अद्यापि प्रिया। हृदयरोगिणः ते हृदये इव कृतः मया एष आघातः। तथापि त्वं प्रीयसे।

माधव :- आम्। त्वं तु सर्वदा मम प्रिया आसीः। असि। भविष्यसि अपि।

लता :- कथम्। वञ्चका जारिणी ...।

माधव :- अलम्। अलम् आत्मनिन्दया। न त्वं पुंश्चली न जारिणी न वा वञ्चका। जानामि ते मातृहृदयम्। मया ज्ञातपूर्वम् एतत् सर्वम्।

लता :- (साश्चर्यम्) किम्। ज्ञातपूर्वम्। सर्वम्।

माधव :- आम्। वर्जयित्वा रघुनाथम्। यत् सत्यं न त्वया परं मयैव त्वं वञ्चिता। शृणु। कस्यापि समापत्याः कारणात् अहं प्रजोत्पादने असमर्थः इति मया विवाहात् पूर्वमेव ज्ञातम्। परं त्वं मां परित्यज्य गमिष्यसि इति भीत्या स्वार्थान्धेन मया एतत् पूर्वं न कथितम्। प्रिये। क्षमायाचनां करोमि। भण क्षान्तोऽसि इति। एष ते पादयोः पतामि।

लता :- अलम्। भर्तः अलम्। क्षान्तोऽसि। अधुना ज्ञातं मया तव अक्षोभस्य कारणम्। तथापि मे प्रियोऽसि रे माधव। वर्जयित्वा अपत्यसुखं त्वया सर्वाणि सुखानि प्रदत्तानि। मया सह सर्वदा स्नेहेन आचरितम्। प्रेम्णा प्रक्षालिता अहम्। मया कृतं व्यभिचारं ज्ञात्वा अपि न लवमात्रोऽपि विषादः कदापि प्रकटीकृतः।

माधव :- प्रिये। विस्मर सर्वं तत्। परं कथय। एतावन्ति वर्षाणि यावत् न त्वया किमपि उक्तम्।

लता :- आम्। कृतेन पापकर्मणा दह्यमानम् आसीत् मे मनः। पश्चात्तापदग्धं मे मनः मरणानन्तरमपि शान्तिं न लप्स्यते इति मत्वा सर्वमेतत् अत्यासन्ने मरणे भणितम्। तेन च ऊनीभूतः मे हृदयभारः। त्वया अपि यत् कृतं न तत् कपटम्। मम वियोगः न भवेत् इत्यैव त्वया कृता एषा वञ्चना।

माधव :- आम्। लते वञ्चना तु त्वया कृता। मया अपि कृता। अधुना विस्मर्तव्या सा।

लता :- आम्।

माधव :- परम् अस्ति किमपि इतः परम् अपि वक्तव्यम्।

लता :- किम्। अन्या काऽपि प्रतारणा।

माधव :- आम्।

लता :- भण। स्वैरं भण। अधुना किमपि सोढुं समर्थं मे मनः।

माधव :- तर्हि पाषाणवत् दृढं कुरु ते मनः।

लता :- कथय। किमपि कथय।

माधव :- अपि स्मरसि। तस्य रघुनाथस्य साहचर्येण ...।

लता :- किम्। पुनरपि रघुनाथः। मन्ये न त्वया अद्यापि क्षान्तं मे पापाचरणम्।

माधव :- प्रिये न तथा। क्षान्तमेव सर्वं तत्। परम् अस्ति एव अत्र तस्य सम्बन्धः। शृणु। तेनैव त्वं गर्भवती भूता। परं प्रसूत्यनन्तरम् अकस्मादेव उच्चरक्तभारस्य कारणात् त्वं मूर्च्छिता। तदानीं तद् अपत्यं त्वया दृष्टम् अपि नासीत्। सा कन्या ...।

लता :- किम्। कन्या ...।

माधव :- आम्। सा कन्या मृतजाता अथवा जातैव मृता आसीत्।

लता :- अनृतमेतत्।

माधव :- न अनृतम्। परं सत्यम्। त्वं तु पञ्चदशदिनानि यावत् मूर्च्छिता आसीः। कन्यायाः मृत्युवार्तां श्रुत्वा मूर्च्छायाः लब्धसंज्ञा त्वं दुःखातिवेगेन पुनरपि मोहं गमिष्यसि इति भीत्या मया अनाथालयात् आनीतः अर्भकः तव समीपे स्थापितः। स च त्वया स्वात्मीयः मत्वा पालितः। स एव दीपकः। यथा त्वं जानीषे तथा न मम पुत्रः। यथा च अहं जाने तथा न स तव पुत्रः अपि।

लता :- अहो अतिकठोरं दैवेन आचरितम्। सा कन्या ...।

माधव :- मृतजाता सा मया एताभ्यां हस्ताभ्यां पितृवने पृथिव्यै समर्पिता।

लता :- अहह। न मया दृष्टा अपि।

माधव :- किम् अधुना शोकेन।

लता :- हुम्। समाप्तम् अधुना तत्सर्वम्। अधुना सम्यक् जानामि ...।

माधव :- किम्।

लता :- कस्मात् स दीपकः इत्थम् आचरति इति।

माधव :- सखि। किमर्थं पुनरपि दीपकः।

लता :- न स आवयोः औरसः पुत्रः। तस्य आवयोश्च मध्ये बन्धः एव न विद्यते। अतः सदृशमेव तेन आचरितम्।

माधव :- सखि। औरसाः पुत्राः अपि अधुना इत्थमेव आचरन्ति। कलिकालः एव अत्र कारणम्। मास्तु ते परिदेवना।

लता :- आः। कालः। कलिकालः। माधव यथा अहं पश्यामि वञ्चनात्मकम् एव मानवानां जीवनम्। कमपि सर्वदा सर्वार्थेन ज्ञातुम् अशक्यमेव। श्रेष्ठतमे पतिपत्निसदृशे सम्बन्धे अपि द्वैतं भवत्येव। तत् किं पुनः इतरेषु सम्बन्धेषु।

माधव :- लते अधुना आवयोः मनसोः सर्वे कोषाः अपावृताः।

लता :- आम्। न कोषगुप्तं किमपि वर्तते।

माधव :- सत्यमेव। मृत्योरनन्तरं यदा ईशसमीपं गमिष्यावः तदा न किमपि गोपनीयं भविष्यति। सर्वम् अपावृतं सरलं पारदर्शकं भविष्यति।

लता :- प्रिय। मृत्योरनन्तरं प्रतीक्षां ते करिष्यामि। अस्मिन् मर्त्यलोके चिरम् उषित्वा यदा देवानां प्रियः भविष्यसि तदा सहैव भगवत्समीपं गमिष्यावः।

माधव :- लते गतमासे तृतीयः हृदाघातः मया पारितः। न अहम् इतः परं चिरं जीविष्यामि।

लता :- नाथ। न अहमपि। न अवशिष्टं बहु आयुष्यमावयोः। किमर्थं जीवितव्यम्। जीवनार्थं प्रयोजनं किमपि न अवशिष्टम्।

माधव :- ऋते दुःखसहनात्।

लता :- आम्। एष मृत्युरपि वञ्चयति जीवान्। ये प्रार्थयन्ते तान् न नयति। परं ये सुदीर्घं जीवितुम् इच्छन्ति तान् सत्वरं नयति।

माधव :- तर्हि एवं कुर्वः।

लता :- किं नाम।

माधव :- लते। मृत्युना अपि अस्मत्कृते विभिन्नं तिथिद्वयं निश्चितं कृतं स्यात्।

लता :- तर्हि मृत्युमेव वञ्चयिष्यावः। आजीवनं परस्पराभ्यां दैवहतकेन च वञ्चितौ आवां मृत्युमेव वञ्चयितुम् अर्हावः।

माधव :- सम्यक् उक्तं त्वया।

लता :- तर्हि एहि। सहैव जीवितान्तं करिष्यावः।

माधव :- एहि। सागरे सर्वतीर्थानि इति उच्यते। तर्हि सर्वमेतत् गृहव्यापारं परित्यज्य हस्तेन हस्तं गृहीत्वा सहैव सागरं प्रवेक्ष्यावः।

लता :- आम्। अस्मिन् क्षणे एव सागरं प्रति गमिष्यावः। तत्रैव शरीरविसर्जनं कुर्वः।

माधव :- एहि प्रिये। अयं स कालः सम्प्राप्तः देहविरहितस्य मेलनस्य।

लता :- देहि मे हस्तम्।

माधव :- गृहाण। शनैः। शनैः।

(गन्तुम् आरभतः। दूरध्वनियन्त्रतः ध्वनिः श्रूयते। उभौ दूरध्वनियन्त्रं परस्परं च पश्यतः। परावृत्य च निर्गच्छतः।)

(पटान्ते श्रूयते कालस्य वचनम्।)

कालः :- (सहास्यम्) गच्छताम्। सुखं गच्छताम् एतौ। हाः हाः हाः। कालोऽहम्। एतयोः रक्षणार्थं मया एव प्रेषिताः रक्षापुरुषाः सागरतटम्। न अद्य वर्तते एतयोः अन्तसमयः। अद्यापि अवशिष्टम् एतयोरायुष्यम्। कालोऽहम्। मां वञ्चयितुं न कोऽपि समर्थः। महावञ्चकोऽहम्। कालोऽहम्। हाः हाः हाः।

(पटान्ते केनापि गीयते।)

अहो गूढजालं विचित्रं यमस्य ।
पुनर्वञ्चितौ दम्पती तेन तूर्णम् ।।
अहो वञ्चना प्राणिनां भूतलेऽस्मिन् ।
न ते जीवितुं वा न मर्तुं समर्थाः ।।

– इति लेखनसीमा –

वञ्चते परिवञ्चते नाटकस्य प्रथमः प्रयोगः
दिनांक ०९-०५-२००५
बालगन्धर्व रंगमन्दिरम्, पुण्यपत्तने

अभिनेतारः

लता : मेधा दिवेकर
माधव : वीरेश कांबळी
काल (उद्घोषक) : धनंजय दिवेकर

साहाय्यकाः

रङ्गभूषा : निशिकान्त उजवणे
वेषभूषा : मुग्धा गोळे
प्रकाशयोजना : आनन्द केळकर
नेपथ्यम् : चन्द्रशेखर कुलकर्णी, चन्द्रशेखर वझे, राम पाणकर
संगीतम् : केदार गोखले
दिग्दर्शन साहाय्यम् : चन्द्रशेखर वझे
निर्मितिप्रमुखा : मुग्धा गोळे
दिग्दर्शनम् : प्रभाकर भांतखण्डे

(महाराष्ट्र राज्य नाट्यस्पर्धायां संस्कृत विभागे महाराष्ट्र सेवा संघ मुलुन्ड द्वारा निर्मितम् एतन्नाटकम् द्वितीय पारितोषिकेण सम्मानितम्। तत्र वीरेश कांबळी महोदयः अभिनयनैपुण्यार्थं रौप्यपदकेन पारितोषिकेण च सम्मानितः। तथैव मेधा दिवेकर महोदया प्रशंसापत्रेण सम्मानिता।)

– नृत्यकूटम् –

(कलिका नाम्नी नर्तकी मन्दिरे नृत्यति।)

पूजापात्रं मया विरचितं विविधैर्द्रव्यैस्तव पूजार्थम्।
पात्रन्यस्तं पूजाद्रव्यं रङ्गमेलनं तव पूजार्थम्।।१।।
इयं हरिद्रा काञ्चनवर्णा तथा कुङ्कुमं रक्तिमरागम्।
ईषत्पीतं घृष्टचन्दनं सुगन्धसारं चैव केशरम्।।२।।
धूमितधूपो धूसरवर्णस्तुषारधवलः कर्पूरोऽयम्।
कृष्णा ह्येषा धूम्रवर्तिका जलदाभं ननु नीलमुत्पलम्।।३।।
पुष्पस्तबके लसन्ति रङ्गास्त्वया निर्मिताश्चित्रविचित्राः।
तथैव रचितो ममैष कायस्त्रिगुणानां मिश्रणेन लिप्तः।।४।।
पञ्चप्राणैः कृतमार्तिक्यं मनसा वाचा तवैवार्चनम्।
समर्पये ते जगदीश्वर हे शरीरमेतत्पूजापात्रम्।।५।।

(नृत्यान्ते कलिका भगवन्तं प्रार्थयते। यदा तस्याःनृत्यं प्रचलति तदा प्रविष्टः महाजनः अपवारितशरीरः तिष्ठति।)

कलिका :– हे भगवन् , त्वं तु नटेश्वरः। नृत्येश्वरः। अहं तु सामान्या नर्तिका। नृत्यमेव मे आजीविका। परं यदा त्वत्कृते नृत्यामि तदा मम मनसि केवलं त्वदीया भक्तिरेव वर्तते। यथा सा मीरा भगवता श्रीकृष्णेन उपकृता स्वीकृता च तथैव मामपि स्वीकुरु। हे दयानिधे, न जानामि पूजां न मन्त्रान् न तन्त्राणि न वा विधिम्। परं जानामि तव करुणाम्। यदा मया मनसा वाचा कायेन च आराधितोऽसि तदा एतां ते दासीं तव पदकमले निरन्तरं स्थापयिष्यसि इति अहं श्रद्दधे। मम स्वामी सखा त्राता च भविष्यसि इति मे दृढा मतिः। अतः पुनरपि एकवारम् एष मे प्रणामः।

विश्वनाथ :– (पुरःसृत्य तालिकावादनं च कृत्वा) अहो भक्तिभावः। अहो नृत्यनैपुण्यम्। अहो शरीरसौन्दर्यम्।

कलिका :– अये कथम्। महाजनाः सम्प्राप्ताः। प्रणमामि।

विश्वनाथ :– सुप्रीतोऽस्मि अनेन तव व्यवहारेण नृत्येन च। हे लावण्यलतिके, समर्पितं त्वया एतत् शरीरसौन्दर्यं ईश्वराय। अलिकुलस्पर्धी एष दीर्घः केशकलापः विशालः भालप्रदेशः एते कमलनेत्रे पक्वबिम्बसदृशम् ओष्ठद्वयम् एषा सिंहकटी कदलीस्तम्भौ इव जघने नूपुराङ्कित्ते पादपद्मे दृष्ट्वा कापि अप्सराः एव तव रूपेण ईशसेवार्थम् अत्र प्राप्ता इति प्रतिभाति मे। हे तन्वङ्गि अपि चिरकालम् अत्र ईश्वरसेवार्थं नृत्यसेविकारूपेण स्थास्यसि।

कलिका :– किम् अत्र कापि संस्थाननर्तिका नास्ति।

विश्वनाथ :– आसीत्।

कलिका :– आसीत् नाम ....।

विश्वनाथ :– सा दिवं गता।

कलिका :– दिवं गता ! कथम्।

विश्वनाथ :– केनापि हता।

कलिका :– अपि तस्याः केऽपि आप्ताः न आसन्।

विश्वनाथ :– न आसन्। सा तु कुमारिका आसीत्।

कलिका :– तर्हि केन हता। अपि न गृहीतः तस्याः घातकः राजसेवकैः।

विश्वनाथ :– कथं गृह्णीयुः। न कोऽपि विजानाति केन सा हता इति। लावण्यवती अप्सराः इव सा त्वादृशी एव नृत्यनिपुणा आसीत्। तस्याः नृत्यं सौन्दर्यं च दृष्ट्वा कतिपये जनाः तस्याम् अनुरक्ताः आसन्। परं न सा कस्यापि वशीभूता। तस्याः जीवितं देवाय एव समर्पितम् इति सा वदति स्म। मन्ये केनापि सौन्दर्यलुब्धेन काममोहितेन वा सा मारिता इति। अस्तु। ईश्वरेच्छा बलीयसी।

कलिका :– अहह! अतिभीषणम् एतत्सर्वम्। भगवत्सेवकानाम् अपि ईदृशः अन्तः भवति। हे भगवन्! निमीलिते वा ते नेत्रे। अपि त्वया प्रदत्तं तादृशं पारितोषिकं तस्यै। अथवा केनापि अन्येन ...।

विश्वनाथ :– कः खलु विजानीयात्। सा तु अधुना न जीवति। भवतु। विस्मर सर्वं तत्। अधुना तु रिक्तं एतत् नृत्यसेविका इति पदम्।अपि त्वं स्वीकरिष्यसि।

कलिका :– कदाचित् स्वीकरिष्यामि।

विश्वनाथ :– कथं कदाचिदिति।

कलिका :– अस्ति तत्र किमपि चिन्तनीयं वक्तव्यं च।

विश्वनाथ :– वद।

कलिका :– प्रथमं तावत् एतत्तु सर्वैः महाजनैः एव निर्णेतव्यं भवेत् नु।

विश्वनाथ :– अयि मुग्धे, न विजानासि। अहमेव महाजनानां प्रमुखः। मम निर्णयः सर्वैः विधिवाक्यमिव स्वीक्रियते। एहि अत्र उपविश। सर्वं सविस्तरं कथयामि। (कलिका तस्मात् दूरम् उपविशति।) किमर्थं तत्र उपविशसि। मत्समीपे उपविश येन सर्वं स्पष्टं श्रोष्यसि। (कलिका तथा करोति।) शृणु। अस्य मन्दिरस्य प्राकारे एव नर्तिकायाः कृते निवासस्थानम् अस्ति। तत्र भवत्याः कृते सेविका कापि भविष्यति। पाकनिर्माणं वस्त्रप्रक्षालनम् इत्यादिकं सर्वं कार्यं सा करिष्यति। भवत्या केवलं प्रतिरात्रं नृत्यसेवा करणीया। तदर्थं प्रतिमासं धनमपि प्राप्स्यसे। वदतु भवती कियद् धनं वाञ्छति इति।

कलिका :– मास्तु धनविषयका चिन्ता।

विश्वनाथ :– शृणु। तदुपरि सन्तुष्टैः महाजनैः अपि वारंवारम् अधिकं धनं किमपि दीयते एव।

कलिका :– नाहम् अधिकं धनं वाञ्छामि। यत् किमपि विश्वनाथेन दीयते तेन सन्तुष्टाहम्।

विश्वनाथ :– अहो आश्चर्यम्। कथं भवती मम नांम अपि विजानाति।

कलिका :– किम् भवतः नाम अपि विश्वनाथः।

विश्वनाथ :– आम्।

कलिका :– परं मया यदा तन्नाम उच्चारितं तदा मम अभिप्राये तु स विश्वंभरः विश्वेश्वरः एव आसीत्। न भवान्।

विश्वनाथ :– भवतु नाम। परं तस्य विश्वंभरस्य सेवार्थं एष विश्वनाथः धनं दास्यति। (हसति।) एहि मया सार्धम्। मम निवासः अपि अस्मिन्नेव प्राकारे त्वदर्थं नियुक्तस्य निवासस्थानस्य पार्श्वे एव वर्तते। तं दर्शयामि। (तस्याः हस्तं धर्तुं यतते। सा अपसरति।)

कलिका :– भोः महाजन अनुचितमेतत्।

विश्वनाथ :– किम्।

कलिका :– एतद् हस्तग्रहणम्। भवान् तु महाजनः। अहं तु सामान्या नर्तिका।

विश्वनाथ :– न सामान्या नर्तिका परं नृत्याप्सराः। अहो भाग्यमस्माकम्। त्वादृशी लावण्यलतिका मे पार्श्वस्था भविष्यति।

कलिका :– परम् अद्यावधि मया न स्वीकृतम् एतत्।

विश्वनाथ :– किं तत्र विचारणीयम्। यद् वाञ्छसि तद् सर्वं ते दास्यामि। स्वीकृतासि मया सर्वार्थेन।

कलिका :– भवता स्वीकृता। परं पुनरपि वदामि। न मया अद्यावधि स्वीकृतः प्रस्तावः।

विश्वनाथ :– कस्मात्।

कलिका :– न मे नृत्याभ्यासः अद्यावधि परिपूर्णतां गतः।

विश्वनाथ :– न परिपूर्णः इति कस्य मतेन।

कलिका :– मम गुरोः। यावत् नृत्यनैपुण्येन स विश्वेश्वरःसुप्रसन्नः न भवति आत्मानुभूतिश्च न भवति स्वान्तःसुखं वा न प्राप्यते तावत्पर्यन्तम् अपूर्णं नृत्यकौशलम् इति मन्यते मम गुरुणा।

विश्वनाथ :– एवम्।

कलिका :– आम्।

विश्वनाथ :– मम मतेन तु भवत्या परिपूर्णतया अभ्यस्ता नृत्यकला। सा कला इतरेषाम् आकर्षणाय आनन्दप्रदर्शनाय वा भवति। विशेषतः स्त्रीभिः नृत्यकलाश्रयः पुरुषाणां मनोरञ्जनाय वशीकरणाय च क्रियते।

कलिका :– नैवम्। अपि भवान् जानाति कः नृत्यप्रवर्तकः इति।

विश्वनाथ :– कथं न जानामि। भगवान् शिवः तस्य प्रिया पार्वती च इति पुराणवाङ्मये लिखितम्।

कलिका :– सत्यम्। अत एव अस्मादृशैः नृत्यसेवकैः नटेश्वरः पूज्यते। भगवतः शिवस्य ताण्डवं देव्याः पार्वत्याः लास्यं च अभ्यस्येते। यदा आदिमः मानवः यस्मात्कस्मादपि कारणात् प्रमुदितः तदा तेन सानन्दं हसितं उच्चैः गर्जितं वा केनापि स्वरेण, तदभूत् गीतम्। तस्य सविधे शृङ्गादिकं यत्किमपि ध्वनिनिर्माणसाधनम् आसीत् तदभूत् वाद्यम्। तथैव पदभ्रमणेन हस्तचालनेन च यत् चेष्टितं तद् नृत्यं सञ्जातम्। तस्य मुखोपरि ये भावाः प्रकटीभूताः ते अभवन् मुद्राभिनयाः। न केवलम् एकलः एव सोऽनृत्यत्। परं ये के च अन्ये मानवाः तत्र आसन् तैः सह तेन तस्य आनन्दः वण्टितः। तदा सर्वैः मिलित्वा यत् नृत्तं तदभूत् समूहनृत्यम्। सा नृत्यकला भगवता शिवेन देव्या पार्वत्या च परिपूर्णतां नीता। अतः यदा वयं नृत्यामः तदा तयोः साक्षात्कारः भवति। इत्थं मम गुरुणा पाठितम्।

विश्वनाथ :– पाठयतु नाम। परम् अस्मिन्काले तु नृत्यं केवलं मनोरञ्जनार्थं लावण्यप्रदर्शनार्थम् एव भवति। अतः अस्मिन् मन्दिरे या संस्थाननर्तिका भवति सा विश्वेश्वरस्य सेवायाः अनन्तरं महाजनानां मनोरञ्जनं करोति।

कलिका :– किं महाजनानां सेवा।

विश्वनाथ :– आम्।

कलिका :– कीदृशी सेवा।

विश्वनाथ :– सेवा नाम मनोरञ्जनम्।

कलिका :– किमर्थं महाजनानां सेवा करणीया।

विश्वनाथ :– अत्रस्थाः सर्वे व्यवहाराः तेषां स्वाधीनाः भवन्ति। अतः ते सर्वे सन्तोषयितव्याः। तेषु च अहं प्रमुखः। एतत्सर्वं शनैः शनैः ज्ञास्यस्येव। हे सुन्दरि ...। धिक् कष्टम्। न अद्यावधि मया तव नाम अपि पृष्टम्।

कलिका :– कलिका। कलिका इति नाम्ना ज्ञायते अयं जनः।

विश्वनाथ :– साधु। तर्हि एषा कलिका मम सहवासेन विकसितं पुष्पं भविष्यति। कलिके, तव नामैव सूचयति।

कलिका :– किम्।

विश्वनाथ :– त्वं कुमारिका इति।

कलिका :– किम्। अत्र कुमारिका एव इष्यते।

विश्वनाथ :– अथ किम्।

कलिका :– कस्मात्।

विश्वनाथ :– यथा देवाय आघ्रातं पुष्पं न समर्प्यते केवलम् अनाघ्रातं पुष्पमेव समर्प्यते यथा वा अनुच्छिष्टम् अन्नमेव नैवेद्यरूपेण दीयते तथैव अविवाहिता कुमारिका एव अत्र संस्थाननर्तिकारूपेण नियुज्यते।

कलिका :– केन कृतः एष नियमः।

विश्वनाथ :– महाजनैः। तादृशी परम्परा वर्तते।

कलिका :– परम्परा। केन निर्मिता।

विश्वनाथ :– महाजनैः।

कलिका :– तर्हि अनुचिता एषा परम्परा।

विश्वनाथ :– कथमिव।

कलिका :- किं मानवशरीरं - स्त्रीशरीरम् अन्नेन तुल्यम्। येन तद् उच्छिष्टम् अनुच्छिष्टं वा भवति। किं स्त्री अन्नवत् भोग्यवस्तु इति मन्यते महाजनैः।

विश्वनाथ :- न तथा। परं नृत्यं तु भोगरूपेण एव समर्प्यते देवाय।

कलिका :- जानामि। परं नृत्यं समर्प्यते। न नृत्याङ्गना। सा कुमारी विवाहिता अथवा गतधवापि भवेत्। किं तत्र हीयते यावत् तस्याः नृत्यं सम्यक् भवति।

विश्वनाथ :- अलं वृथा विवादेन। त्वं तु कुमारिका एव।

कलिका :- यदि न भवेयम् ...।

विश्वनाथ :- नाहं सम्यक् अवगच्छामि।

कलिका :- अहं वाग्दत्ता वधूः कस्यापि।

विश्वनाथ :- वाग्दत्ता।

कलिका :- आम्। वाग्दत्ता।

विश्वनाथ :- केन दत्ता। कस्मै दत्ता।

कलिका :- मम पितरौ तु न वर्तेते। मम बाल्ये वयसि एव उभावपि दिवं गतौ। अतः मया स्वयमेव वृतः कोऽपि तरुणः।

विश्वनाथ :- (आत्मगतम्) स तु दूरीकर्तुं शक्यते येन केनापि उपायेन। पितरौ अपि न स्तः। तर्हि सुलभा एषा।

कलिका :- किमुक्तं भवता।

विश्वनाथ :- न किमपि। मया चिन्तितम् ...।

कलिका :- किम्।

विश्वनाथ :- वाग्दत्ता नाम कुमारिका एव।

कलिका :- आम्। परं कोऽत्र कौमार्येण सम्बन्धः।

विश्वनाथ :- तादृशी परम्परा ...।

कलिका :- किमर्थं पुनःपुनः परम्परा-परम्परा इत्येव उच्यते। यथाहं पश्यामि तथा नृत्यभोगः देवस्य कृते भवति। न इतरेजनानां कृते महाजनानां कृते वा। परं अत्र कुमारिका एव इष्यते त्वादृशैः जनैः। न ईश्वरेच्छा परं त्वादृशानां भोगेच्छा एव कारणम् इति दृश्यते। सर्वे भोगदासीमेव वाञ्छन्ति। न संस्थाननर्तिकाम्। सा धनेन भयेन वा वशीकर्तुं शक्या भवेत्। सा केवलं नाम्ना एव देवस्य दासी परं सत्यार्थेन तु त्वादृशानां धूर्तानां कापटिकानां भोगदासी भवति। अधुना सुस्पष्टमेतत्। विकृताः धूर्ताः दुष्टाः यूयं सर्वे।

यथा त्वयैव पूर्वमुक्तं तथा त्वं तेषां प्रमुखः। अतः न महाजनः परं महादुष्टः महाधूर्तः असि।

विश्वनाथ :– किमहं दुष्टः।

कलिका :– आम्। दुष्टः। महाजनपदस्य अनुचितं प्रयोगं कुर्वाणः कामान्धः।

विश्वनाथ :– किमहं कामान्धः।

कलिका :– आम्। अन्यथा कथं त्वया प्रथमपरिचये एव मम हस्तः गृहीतः। स्त्रीणां षट् ज्ञानेन्द्रियाणि भवन्ति न पञ्च। यदा त्वया मम हस्तः स्पृष्टः तदा एव ज्ञातः मया ते अभिप्रायः। रे विषयान्ध ...।

विश्वनाथ :– तदानीं केवलं हस्तः एव गृहीतः। अधुना त्वामपि ग्रहीष्यामि। कथं महाजनं मां गालिप्रदानं करोषि। अधुना सत्यमेव त्वां बलात्कारेण ग्रहीष्यामि। मम शयनमञ्चकं च नीत्वा कामतृप्तिं करिष्यामि। प्रज्वालितः त्वया मे कामाग्निः। (तां धर्तुं यतते। सा इतस्ततः धावति।)

कलिका :– परित्रायताम्। परित्रायताम्।

विश्वनाथ :– न कोऽपि अत्र श्रोष्यति। कृतं मया निर्मक्षिकम् एतन्मन्दिरम् आगच्छता एव। प्रवेशद्वारमपि पिहितम्। कथं पलायसे।

कलिका :– न अन्यः कोऽपि शृणुयात्। परम् एष भगवान् विश्वेश्वरः सर्वं पश्यति। सर्वं शृणोति।

विश्वनाथ :– (विहस्य) न स किमपि शृणोति। स तु पाषाणः।

कलिका :– अहो धाष्टर्यम्। अहो निर्लज्जत्वम्। यः सर्वैः जनैः सर्वभावेन पूज्यते यस्यैव प्रसादात् त्वया सर्वं प्राप्यते तं विश्वेश्वरं पाषाणं मन्यसे। रे कृतघ्न दुर्जन एष भगवान् त्वां मृत्योरनन्तरं रौरवनरके प्रक्षेप्स्यति।

विश्वनाथ :– केन दृष्टः स्वर्गः नरकः वा। मत्कृते तु त्वादृश्याः अप्सरसः उपभोगः एव स्वर्गः। एष गृह्णामि।

(पुनरपि तां धर्तुं यतते। सा इतस्ततः धावन्ती क्षणमात्रं गर्भागारं प्रति पश्यति। गर्भागारं प्रवेष्टुकामां तां विश्वनाथः हस्तेन धरति। रङ्गमञ्चस्य मध्यभागम् आनयति।)

विश्वनाथ :– अधुना कुत्र गमिष्यसि।

कलिका :– भोः भगवतः मन्दिरमेतत्। न भोगमन्दिरम्। कथमस्मिन् मन्दिरे ईदृशी बलक्रियां कुर्वतः तव लज्जा कापि न वर्तते। रे निर्लज्ज - अधम - दुष्ट- - ।

विश्वनाथ :– अधुना पश्य मे दुष्टत्त्वं निर्लज्जत्वं च। मां दुष्टं भणसि। यथा मया सा कमलिनी उत्पाटिता ..।

कलिका :– का एषा कमलिनी।

विश्वनाथ :– भूतपूर्वा नृत्यसेविका।

कलिका :– कस्मात् उत्पाटिता।

विश्वनाथ :– तया अहं धिक्कृतः। नकारः प्रदत्तः शरीरसुखाय। वाञ्छितं न प्रदत्तम्। अतः उत्पाटिता।

कलिका :– उत्पाटिता नाम हता।

विश्वनाथ :– (विहस्य) कथं मादृशः पुण्यात्मा तादृशं निन्द्यं कर्म आचरिष्यति।

कलिका :– इति जनैः चिन्तितम्।

विश्वनाथ :– आम्। कस्मिन्नपि प्रभातकाले राजसेवकैः तस्याः मृतं कलेवरं तस्याः एव निवासस्थाने प्राप्तम्। केनापि गलघट्टनेन सा मारिता।

कलिका :– रे धूर्त, मन्ये त्वयैव ...।

विश्वनाथ :– आम्। मयैव सा मारिता। एताभ्यां हस्ताभ्यां मारिता। परं न केनापि ज्ञातम्। न कोऽपि ज्ञास्यति अपि। अधुना शृणु यत्किमपि वदामि।

कलिका :– किम्।

विश्वनाथ :– यदि एतत् ते सौन्दर्यं मत्सुखाय न भवेत् तर्हि ...।

कलिका :– तर्हि। तर्हि किम्।

विश्वनाथ :– तवापि तादृशी एव गतिर्भविष्यति।

कलिका :– किम् ममापि।

विश्वनाथ :– आम्। तवापि। परं यदि मच्छन्दानुसारं मम कामतृप्तिं करिष्यसि तर्हि ...।

कलिका :– जीविष्यामि। हन्त। किमेतत् आपतितम्। ईशसेवार्थम् अत्र मन्दिरम् आगतवती अहम् अधुना भोगदासी भविष्यामि। का गतिः। हे भगवन्, अधुनापि स्त्रीशरीरं पुरुषैः भोग्यवस्तुवत् मन्यते। सा अबला निर्बला एव भवति। न त्वादृशः सर्वेश्वरः अपि तां रक्षितुं समर्थः भवति। त्वयैव

निर्मितम् एतत्सुकोमलं शरीरं न क्रौर्यम् अर्हति। अहह। मृत्युः। गलघट्टनेन मृत्युः। न हि। न हि। अहं जीवितुमिच्छामि। यदि शरीरसमर्पणेन जीवनं रक्ष्यते तर्हि तदपि स्वीकरिष्यामि। रे विश्वनाथ, यद् दुष्कर्म तत्करोषि। अवाञ्छनीयं वाञ्छसि। त्वादृशाः दुःशासनाः अद्यापि वर्तन्ते पृथिव्याम्। नास्ति मम अन्यथा गतिः। अतः स्वीकृतं मया। एहि। गृहाण एतत् शरीरम्। स्वहस्तेनैव अपाकुरु मे वस्त्राणि। नाहं प्रतीकारं करिष्यामि। रे पाप, यत् किमपि करिष्यसि तदहं सहिष्ये। एहि। किमर्थं विलम्बसे।

विश्वनाथ :– साधु। परं न रतिरङ्गोत्सवः अस्य मन्दिरस्य पाषाणभूमौ करणीयः। तदर्थम् आवश्यकी मृदुमृदुला शय्या। एहि। मम निवासं गच्छावः। परं सम्यक् शृणु। यदत्र प्रवर्तितं तद् न कस्यापि कदापि कथयितव्यम्। यदि केनापि ज्ञातं भविष्यति तर्हि ...।

कलिका :– जानामि। एषा कलिका अपि कमलिनीव उत्पाटिता भविष्यति।

विश्वनाथ :– आम्। सम्यक् ज्ञातं त्वया। शरीरमिव बुद्धिरपि ते शोभनी। एहि मया सार्धम्। मुखं ते यथावत् सस्मितं कुरु येन न कस्यापि आशङ्का भवेत्।

(गर्भागारतः सहसा प्रविशति वीरव्रतः। स पृष्ठतो गत्वा विश्वनाथं हस्ताभ्यां धरति।)

वीरव्रत :– किमर्थं सस्मितवदना। सा तु सहास्यवदना आगमिष्यति। परं न त्वया सह।

विश्वनाथ :– (भीत्वा कातरस्वरेण) क -क - कस्त्वम्।

वीरव्रत :– वीरव्रतः।

विश्वनाथ :– कुत आयातः।

वीरव्रत :– गर्भागारतः।

विश्वनाथ :– अपि द -द- देवस्त्वम्।

वीरव्रत :– न देवः। मृत्युदूतः।

विश्वनाथ :– मुञ्च माम्। मुञ्च माम्। महाजनोऽहम्।

वीरव्रत :– कथं मुञ्चेयम्। अपि मृत्युदूतः कमपि मुञ्चति।

विश्वनाथ :– अपि सत्यमेव मृत्युदूतस्त्वम्।

वीरव्रत :– न परमार्थेन। परं त्वत्कृते तु साक्षात् मृत्युदूतः एव। कलिके, गर्भागारे रज्जुरस्ति। तया बधान अस्य हस्तौ।

कलिका :– यद् भवानाज्ञापयति। (कलिका गर्भागारं प्रति गच्छति।)

विश्वनाथ :– भोः कथं सा गर्भागारं प्रविशति। कथं च त्वं प्रविष्टः।

(कलिका गर्भागारादानीतया रज्ज्वा विश्वनाथस्य हस्तौ बध्नाति।)

वीरव्रत :– न वर्तते राजकार्येषु देवानां कोऽपि निर्बन्धः। ना विष्णुः पृथिवीपतिः।

विश्वनाथ :– अपि राजपुरुषस्त्वम्।

वीरव्रत :– आम्। राजाधिराजविक्रमस्य गुप्तचरप्रमुखोऽहम्। महाराजेनैव नियुक्तोऽहं कमलिन्याः मृत्युगूढस्य विश्लेषणार्थम्। दशदिनानि यावद् मया गुप्तरूपेण अत्र पर्यवेक्षणं कृतम्। त्वया अनया कलिकया सह यथा व्यवहृतं तद् दृष्टम्। यद् तस्यै उक्तं तत् सर्वं श्रुतम्। त्वमेव घातकः कमलिन्याः।

कलिका :– भोः कामान्ध जाल्म, ज्ञातम् अधुना कथं स ईश्वरः सर्वं पश्यति सर्वं शृणोति च इति। सहस्राक्षः सहस्रपात् स ईश्वरः सर्वं विजानाति। यदा मार्जारः चौर्येण दुग्धं पिबति तदा तस्य नेत्रे निमीलिते भवतः। न कोऽपि मां पश्यति इति स मनसि चिन्तयति। यदि न कोऽपि मानवः तथापि स ईश्वरः तत्सर्वं पश्यति एव।

विश्वनाथ :– नात्र ईश्वरस्य सम्बन्धः।

वीरव्रत :– अस्ति। सम्बन्धः अस्ति। राजा तु देवानाम् अंशेभ्यः एव निर्मितः ईश्वरेण इति प्रसिद्धम्। अधुना स नरेश्वरः एव त्वां दण्डयिष्यति। मृत्युदण्डेन।

विश्वनाथ :– किम्। मृत्युदण्डेन।

वीरव्रत :– आम्। तदा ज्ञास्यसि किं तया अभागिन्या कमलिन्या अनुभूतं स्यादिति। परं न्यायदानं तु राज्ञा एव करणीयम्। न मया। एष त्वां राजकुलं नयामि। प्रिये कलिके ...।

कलिका :– प्रियः आज्ञापयतु।

विश्वनाथ :– क -क - कथं प्रियः इति। अपि ज्ञातपूर्वः ....।

वीरव्रत :– रे जाल्म एषा मे वाग्दत्ता वधूः। तस्याः एव साहाय्येन मया विरचितम् एतद् नृत्यकूटम्। परं किं तव अनेन। एहि प्रिये राजकुलं नयावः एनं घातकम्।

कलिका :– यद् आज्ञापयति भवान्। परं प्रिय वीरव्रत, भवान् अग्रे गच्छतु। अहं वेषपरिवर्तनं विधाय अन्वागमिष्यामि।

वीरव्रत :– अनुमतं मया। परं प्रिये आवयोर्विवाहमङ्गले एष एव वेषः त्वया धारयितव्यः। अनेन वेषेण त्वं स्वर्गीया देवता इव भाससे।

कलिका :- (सलज्जम्) अलम् अलीकया श्लाघया। गच्छतु भवान्।

वीरव्रत :- एष निर्गतोऽहम् अनेन बन्दिना सह।

कलिका :- (गर्भागारे स्थितां मूर्तिमुद्दिश्य) हे भगवन्। नृत्यकलायाः साहाय्येन एव दण्डितः नृत्याङ्गनायाः घातकः। सुप्रीतः मे प्रियकरः। किम् इतःपरमपि प्रियमस्ति। तथापि इदमस्तु भरतवाक्यम्।

त्वं हि नटेश्वर विश्वविधाता त्वं शम्भुस्त्वं हरिर्मुरारिः।
न कोऽपि भेदस्तव पदकमले भवेन्नरो वा भवेद्धि नारी।।धृ।।
अर्धेनाभूद् ब्रह्म नु पूर्वं पुमान् द्वितीयार्धेनाभूत् स्त्री।
नोच्चः पुरुषो न स्त्री नीचा सत्यमीदृशं तथा हि सृष्टिः।।१।।
भवेत् स्थापिता तयोस्तुल्यता मनुजानां व्यवहारे लोके।
नात्याचारा भवन्तु विश्वे भूयुर्मनुजाः सुजनाः सर्वे।।२।।
शान्तिं प्रीतिं वितर समृद्धिं तव तनयेभ्यः करुणासिन्धो।
विनताः सर्वे तव पदकमले भवेन्नरो वा भवेद्धि नारी।।३।।

– इति लेखनसीमा –

नृत्यकूटम् नाटकस्य प्रथमः प्रयोगः
दिनांक १५-११-२००७
सावित्रीबाई फुले नाट्यगृहम्, डोम्बिवली

अभिनेतारः

कलिका : नेहा केळकर
विश्वनाथ : सुहास पै
वीरव्रत : संतोष अभ्यंकर

साहाय्यकाः

नेपथ्यम् : जयंत कासारपालकर
नेपथ्यसाहाय्यम् : जीवनचन्द्र नामजोशी
प्रकाशयोजना : संतोष अभ्यंकर
प्रकाशयोजनासाहाय्यम् : शशिकांत बेर्डे
संगीतम् गायनम् च : स्वाती पेंडसे
ध्वनिसंयोजनम् : हरिदास कदम
नृत्यदिग्दर्शनम् : नेहा केळकर
वेषभूषा : स्मिता तळेकर
रङ्गभूषा : निशिकान्त उजवणे
निर्मितिव्यवस्था : यशवंत सावर्डेकर
निर्मितिप्रमुख : दिलीप पिंगे
दिग्दर्शनम् : गुरुप्रसाद कार्लेकर

(महाराष्ट्र राज्य नाट्यस्पर्धायां संस्कृत विभागे एअर इंडिया स्थानीय लोकाधिकार समिती, मुंबई, कलाविभाग द्वारा निर्मितम् एतन्नाटकम्। तत्र नेहा केळकर महोदया अभिनयनैपुण्यार्थं रौप्यपदकेन पारितोषिकेण च सम्मानिता।)

– बालकाः वयम् । –

जय जय शङ्कर साम्बसदाशिव वन्दे त्वामिह नटरङ्गे ।
वससि नटेश्वर यद्यपि निर्जर दूरे निर्मलगिरिशृङ्गे ।।ध्रु ।।
सह पार्वत्या त्वं रमसे
कुटुम्बवसतिः कैलासे
धनं सुखं ते गृहवासे
सुरवरपरिचरसेवितचरणः प्रमोदसे त्वं तरुकुञ्जे ।। १ ।।
प्रचलति नृत्यं ताथै थैतत्
नदति मृदङ्गो धात्रक् तिन्त्रक्
झल्लकनादे टिण् टिण् टिण् टक्
अपि स्मरारे स्मरसि साम्प्रतं भक्तांस्त्वं खलु दयानिधे ।।२।।
पतिर्गणानां गजाननः
वाहिनीपतिः षडाननः
द्वावपि तनयौ सुखभाजौ
कथं विस्मृता मानवपुत्राः परं त्वया रे सुखसङ्गे ।।३।।
केऽपि निबद्धा ऋणपाशात्
दासाःकेचन दारिद्र्यात्
दुःखनिमग्ना अज्ञानात्
दास्याद्दैन्यादुद्धर सर्वानिति प्रार्थ्यते जगत्पते ।।४।।

(उपरितनं नृत्यगीतं समाप्य बालबालिकाःरङ्गमञ्चात् विनिर्गच्छन्ति। ततः प्रविशति सूत्रधारः।)

सूत्रधार :– भोः सज्जनाः अपि दृष्टं भवता कथम् एताः बालबालिकाः गायन्ति नृत्यन्ति क्रीडन्ति हसन्ति इति। बालकाः सर्वदा सानन्दं सञ्चरन्ति। सुखमयम् आल्हाददायकं च तेषां जीवनम्। कोमलानि तेषां शरीराणि मनांसि च। यथा लताकुञ्जेषु कुसुमानि विकसन्ति विलसन्ति च तथैव मानवतरुकुञ्जे एतानि बालकरूपाणि कुसुमानि मानवजातेः भूषणानि। एताः एव बालबालिकाः आगामिनि काले युवकयुवतयः भविष्यन्ति। राष्ट्रोद्धारार्थं यतिष्यन्ते। अतः एतादृशानां बालकानां सम्यक् आरोग्यवर्धनम् आयुर्वर्धनं च अस्माकं कर्तव्यम्। अपि तद् अस्माभिः सम्यक् क्रियते। अपि समाजे बालकानां कृते सर्वत्र ईदृशी आनन्दमयी अवस्था दृश्यते। यथा अहं पश्यामि तथा बहवः बालकाः दारिद्र्यात् दुःखमग्नाः भवन्ति। कथं तानि कुसुमानि बाल्ये वयसि एव निर्माल्यवत् शुष्काणि जीर्णशीर्णानि च भवन्ति। केचन पाठशालां न गच्छन्ति एव। अतः ते अशिक्षिताः अज्ञानिनः भवन्ति। अज्ञानात् दारिद्र्यं दारिद्र्यात् च अज्ञानम् इत्येतत् दुष्टचक्रम्। केचन आबाल्यात् दासाः सेवकाः वा भवन्ति। यत्रकुत्रापि यात्किमपि कार्यं प्राप्यते तत् स्वीकुर्वन्ति। यथाकथञ्चित् जीवन्ति। कदाचित् व्यसनाधीनाः अपि भवन्ति। तत्र कस्तेषाम् अपराधः। तेषां कृते यत् करणीयं तत् न तेषां पितृभिः क्रियते न वा समाजेन क्रियते। सर्वकारेण बहवः नियमाः अधिनियमाः वा कृताः। परं तेषां परिपालनं न केनापि क्रियते। आत्मानं सुविद्यं सुधन्यं मन्यमानैः जनैः अपि न क्रियते। अतः यदि ईदृशानां बालकानां साहाय्यं जागरूकैः शिक्षितैः बालकैः एव ज्येष्ठानां साहाय्येन क्रियते तर्हि किम् अस्यां दुरवस्थायां परिवर्तनं भविष्यति। पश्यन्तु भवन्तः। (निर्गतः।)

(ततः प्रविशतः सुवस्त्रधारिणी अलङ्कृता नन्दिनी। ताम् अनुगच्छन् अर्धवस्त्रधारी भारवाहकः बालकः म्हादुः च। तस्य शिरसि पेटिकाः पिटकानि तथैव स्कन्धे धृता भस्त्रिकाः स्यूतः च)

नन्दिनी :– अरे म्हादो त्वरितं त्वरितं चल रे दास्याःपुत्र। एतावद् अन्नं प्रतिदिनं खादसि तत् कुत्र गच्छति। एहि। अहं अग्रे गच्छामि। सर्वमेतत् सत्वरं गृहमानय। (निर्गता)

(यत्र नन्दिनी गता तस्माद्विभागात् तेनैव मार्गेण प्रविशन्ति हसन्तौ गायन्तौ द्वौ बालकौ द्वे बालिके च।)

विक्रम :– धा गे ना तिनक धिं। धा गे ना तिनक धिं। धा गे ना तिनक धिं। धा गे ना तिनक धिं।

अशोक :– न हि न हि। धिं धिं धा तिं त्रक धिं धागे त्रक। धिं धिं धा तिं त्रक धिं धागे त्रक। एवम्।

लता :– ता थै थै तत्। तत् थै थै तत्। ता थै थै तत्। तत् थै थै तत्।

कला :– धा धा धिं ता। किट् धा धिं ता। किट् तक गदिघन। धा धा धिं ता।

(उच्चै वदद्भिः नृत्यद्भिश्च बालकैः अवरुद्धे मार्गे कथमपि प्रचलतः तैः सह संभाव्यात् आघातात् आत्मानं रक्षितुं इच्छतः म्हादोः पदं स्खलति। अनवधानेन बालकैः आहतः म्हादुः निपतति। तेन शिरसि धृतः भारः अपि पतति। बालकाः म्हादुं उत्थापयन्ति। म्हादुः रोदिति।)

कला :– क्षमस्व। क्षमस्व। अलं रोदनेन।

अशोक :– भोः अपि क्षतिग्रस्तः त्वम्। क्षन्तव्याः वयम्। अपि चलितुं शक्नोषि। किमर्थं रोदिषि।

विक्रम :– रे अशोक कति प्रश्नान् पृच्छसि। प्रथमम् एतत् सर्वम् एकत्रीकुरुत। (अशोकः बालिके च तथा कुर्वन्ति।) (म्हादुं प्रति) समाश्वसिहि। समाश्वसिहि।

लता :– (म्हादोः अश्रूणि प्रमार्ष्टि।) अलम्। अलं रोदनेन। किं तव नाम।

म्हादुः :– म्हादुः। (पुनरपि रोदिति।)

कला :– लते कदाचित् तस्य वेदनाः भवन्ति। एष विक्रमः नृत्यति स्म। तेनैव एष पातितः।

लता :– सत्यम्। कले ....

विक्रम :– न केवलम् अहमेव। परं वयं सर्वेऽपि नृत्यगानमग्नाः आस्म।

अशोक :– सत्यम्। तर्हि एष अस्माकं सर्वेषाम् अपराधः।

विक्रम :– सम्यक् वदति अशोकः। तर्हि प्रायश्चित्तमपि सर्वेषामेव। कले, लते ...

लता :– तदेव करोमि। (म्हादुं प्रति) भोः, कथय। किमर्थं रोदिषि। अधुना मित्राणि वयं सर्वे।

म्हादु :– एतासु पेटिकासु महार्हाणि काचपात्राणि सन्ति। कदाचित् तानि भग्नानि भवेयुः। अस्मिन् स्यूते दशकिलोमितं धान्यम् अस्ति। तत् सर्वम् अधुना मिश्रितम्। एतत् सर्वं गृहं प्रति नेयम्।

अशोक :– तर्हि वयं सर्वे साहाय्यं करिष्यामः। कुत्रास्ति तव गृहम्।

म्हादु :– मम गृहम्। हन्त, मम तु गृहमेव नास्ति।

लता :– किं गृहं नास्ति।

म्हादु :– अस्ति। परं न जाने तत् कुत्रास्ति इति। एतद् वस्तुजातं स्वामिनः गृहं प्रति नेयम्। अहं दासः तस्मिन्गृहे।

लता :– दासः नाम किं।

अशोक :– एतदपि न जानासि। दासः नाम क्रीतः सेवकः।

कला :– किम् एतादृशः बालकः अपि कस्यचित् सेवकः भवति।

म्हादु :– आम्। अहं तु दासः एव तस्मिन् गृहे।

लता :– मातुः पितुः वा सेवा अस्माभिरपि क्रियते।

कला :– परं सा तु प्रेमादरेण। इतरेषां गृहे धनार्थं सेवाकार्यं तदपि ईदृशम्। यत् प्रौढैः सेवकैः कार्यं तद् बालकैः कार्यते। अहो अमानुषम् अयोग्यम् अन्याय्यम् एतत्।

अशोक :– साधु उक्तं। परं वयं तु बालकाः। किं करिष्यामः। तत्र को मार्गः विद्यते।

विक्रम :– विद्यते।

अशोक :– कीदृशः।

विक्रम :– पश्चात् कथयिष्यामि। प्रथमम् एनं तस्य स्वामिनः गृहं प्रापयिष्यामः। एहि रे म्हादो। लते, अशोक,सर्वे तस्य भारं स्वीकुरुत। आगच्छन्तु सर्वे। म्हादो त्वं गृहं दर्शय।

(सर्वे बालकाः भारं स्वीकृत्य म्हादुना सह निर्गच्छन्ति। म्हादुः गृहं दर्शयति। बालकाः सोपानपङ्क्तौ भारं स्थापयित्वा विनिर्गच्छन्ति।)

म्हादु :– द्वारम् उदघाटयतु भवती। स्वामिनि।

नन्दिनी :- (द्वारम् उद्घाट्य।) आगतोसि भोः। कथं चिरायितम्। एतावत्कालं कुत्र आसीः।

म्हादु :- पतितोऽहं मार्गे।

नन्दिनी :- कथम्। पतितः। तर्हि मन्ये मम काचपात्राणां विनाशः एव कृतस्त्वया। पश्यामि तावत्। आनय तत् सर्वम् अभ्यन्तरम्। (म्हादुः विकलगत्या एकैकां पेटिकां गृहाभ्यन्तरं नयति। नन्दिनी पेटिकामेकां उद्घाट्य पश्यति।) अहो दुष्कृतम्। सर्वाणि काचपात्राणि भग्नानि। इत एहि रे दास्याःपुत्र, तवापि मुखभङ्गं करोमि।

(सा धर्तुं यतते। म्हादुः विकलगत्या इतस्ततः धावति। पादयोः वेदनाः नाटयति। नन्दिनी तं हस्तेन धृत्वा ताडयति।)

म्हादु :- मा। मा ताडयतु भवती। पतितोऽहं। मम पादयोः वेदनाः भवन्ति।

नन्दिनी :- एवम्। कथं पतितः।

म्हादु :- क्षुधापीडितोऽहम् एतावद् भारं धृत्वा सावधानं प्रचलन् आसम्। परं मार्गे बालकाः क्रीडन्तः आसन्। तैः अवरुद्धे मार्गे अकस्मादेव पतितः। क्षम्यताम्।

नन्दिनी :- कथं क्षन्तव्यः। एतावन्ति महार्हाणि काचपात्राणि नष्टानि। एतद् प्रथमम्। (इति हस्तेन प्रहरति।) एतद्द्वितीयम्। (पुनः ताडयति।) एतत् तृतीयम्। (ताडयति।) गृहाण।

म्हादु :- मा। मा एवम्। न मया जानता पातितानि। अकस्मादेव पतितोऽहम्।

नन्दिनी :- अकस्मात्। किमेतेषां मूल्यं तव पिता दास्यति। पञ्चाशत् रुप्यकाणि विनिष्टानि। अतः - - - अतः अद्यप्रभृति पञ्च दिनानि यावत् भोजनं न लप्स्यसे।

म्हादु :- मा एवम्। भूरि बुभुक्षितोऽहम्। आप्रातः न किमपि खादितम्।

नन्दिनी :- न खादितं नु। अधुना लड्डुकाः लत्ताप्रहाराश्च ते खादनार्थम्। (इति उक्त्वा तस्य पार्श्वे प्रहरति। म्हादुः रोदिति।) अलं रोदनेन। बहु नाटितं त्वया। एहि। (म्हादुं कर्णे धृत्वा) एतत् सर्वम् पत्ये कथयामि। स एव त्वां दण्डयिष्यति। एहि अभ्यन्तरम्। (उभौ अभ्यन्तरं गच्छतः।)

(प्रविशन्ति विक्रमः अशोकः कला लता च)

लता :– अशोक अधुना तस्मिन् गृहे किं भविष्यति। म्हादोः स्वामिनी तं ताडयिष्यति।

अशोक :– अयि लते या क्रूरा स्वामिनी तावन्तं भारं बालकस्य शिरसि स्थापयति सा किमन्यत् करिष्यति।

कला :– कथं जनाः तावन्तः निर्दयाः क्रूराश्च भवन्ति।

विक्रम :– धनोन्मादः। धनोन्मादः एव तत्र कारणम्।

अशोक :– मन्ये न केवलं तदेव। परं बालकस्य दौर्बल्यं तस्य दारिद्र्यम् अशिक्षितत्वं चापि तत्र कारणम्।

कला :– किं स पाठशालां न गच्छति।

अशोक :– पाठशालाम्। अये न केवलं म्हादुना परं तस्य पित्रा पितामहेनापि पाठशाला दृष्टापि न भवेत्। तर्हि कुतः तत्र पठनम्।

लता :– तर्हि अस्माभिः म्हादोः कृते किमपि कर्तव्यम्।

अशोक :– किं कर्तव्यम्।

विक्रम :– तदेव वक्तुकामोऽस्मि।

अशोक :– वद। सत्वरं वद।

विक्रम :– वयं सर्वे अन्यैः मित्रैः सह म्हादोः गृहं गत्वा तस्य स्वामिनं ताडयिष्यामः म्हादुं च मोचयिष्यामः।

कला :– नहि नहि। अयोग्यमेतत्।तेन किं सेत्स्यति। मुक्तेरन्तरं म्हादुः कुत्र गमिष्यति।

अशोक :– तदपि सत्यम्। विक्रम, न वयं आततायिनः। अस्मत्कृतेन ताडनेन म्हादोः स्वामी कदाचित् अस्मानेव कारागृहं प्रापयिष्यति। अत्र बुद्धिचातुर्येण एव वर्तितव्यम्।

कला :– तर्हि न तव कोऽपि उपयोगः।

अशोक :– कस्मात्।

कला :– तव बुद्ध्या सह सम्बन्धः कुत्र वर्तते।

अशोक :– कले, ताडयिष्यामि।

लता :– शान्तम्। शान्तम्। किम् अस्मत्सु एव कलहेन।

कला :– स्मृतं मया।

अशोक :– किम्।

कला　:– अस्य विक्रमस्य पिता विधिज्ञः वर्तते। तमेव प्रक्ष्यामः।

लता　:– साधु। साधु उक्तं त्वया। येन केनापि मार्गेण म्हादोः मुक्तिः करणीया। विक्रमस्य गृहं गच्छामः।

सर्वे　:– आम्। निश्चितम्।

(सर्वे गायन्ति नृत्यन्ति च।)

शैशवे हि दास्यबद्ध एष तस्य मुक्तये।
बालका वयं तथापि संगता यतामहे।।धृ।।
बालका भवन्ति राष्ट्रवैभवं परं कथं।
तेषु केऽपि यत्र तत्र दुःखदैन्यबन्धिताः।।
प्राप्यते न भोजनं न शिक्षणं न रक्षणम्।
तैस्तु दास्यवृत्तिरेव कार्यते जनैः सदा।।१।।

(निर्गताः।)

(प्रविशन्ति नन्दिनी नरेन्द्रः म्हादुः च।)

नन्दिनी　:– पश्यतु भवान्। अनेन दुरात्मना मया क्रीतानि सर्वाणि नूतनानि काचपात्राणि चूर्णितानि।

नरेन्द्र　:– कथं चूर्णितानि। किं रे म्हादो, अपि उन्मत्तस्त्वम्।

म्हादुः　:– नहि स्वामिन्। शिरसि भूरिभारं वहन् अहं मार्गे पतितः।

नन्दिनी　:– नास्य कस्मिन्नपि कार्ये अवधानं भवति। अनेन तानि पातितानि।

म्हादुः　:– स्वामिन्, श्रान्तः क्षुधापीडितः अहं पदस्खलनेन अकस्मादेव मार्गे पतितः। तेन च ...

नन्दिनी　:– परं तेन मम पञ्चाशत् रुप्यकाणि विनष्टानि। तानि कः दास्यति। अपि तव पिता...।

नरेन्द्र　:– हुः।तस्य पिता। कुत्रास्ति सः। पञ्चवर्षेभ्यः पूर्वं गृहीतं ऋणं न तेन अद्यापि प्रत्यर्पितम्। तदनु म्हादुम् अत्र सेवकरूपेण स्थापयित्वा न जाने कुत्र गतः।

नन्दिनी　:– जानामि। जानामि। नष्टान्यस्माकं पञ्चाशत् रुप्यकाणि। अतः एष दण्डनीयः।

नरेन्द्र :– कथं।

नन्दिनी :– पञ्चदिनानि यावत् एतस्मै अन्नमेव न देयम्।

म्हादु :– स्वामिनि आप्रातः मया न किमपि खादितम्। अतीव बुभुक्षितोऽहम्। नाहं जीविष्ये।

नरेन्द्र :– नन्दिनि एष दास्याःपुत्रः अन्नेन विना सत्यमेव मरिष्यति।

नन्दिनी :– म्रियताम्। सुखं म्रियताम्।

नरेन्द्र :– परं तदनन्तरं विनावेतनः सेवकः कुतः प्राप्स्यसे।

नन्दिनी :– द्रक्ष्यावः। अधुना तु अस्मै न किमपि खाद्यं दास्यामि। (म्हादुं प्रति) गच्छ रे मूर्ख, अभ्यन्तरं गत्वा भाजनानि स्वच्छीकुरु।

म्हादु :– परं स्वामिनि ...

नन्दिनी :– (उच्चैः) गच्छ। अन्यथा ....

(म्हादुः सरभसम् अभ्यन्तरं गच्छति। नरेन्द्रः अपि अभ्यन्तरं प्रविशति। द्वारि ठक् ठक् शब्दः भवति)

नरेन्द्र :– (अभ्यन्तरादेव) प्रिये पश्य कस्तत्र ठक् ठक् शब्दं करोतीति।

(नन्दिनी द्वारम् उद्घाटयति। प्रविशतः रक्षानिरीक्षकः विजयः तस्य साहाय्यकः विक्रमसिंहः च।)

विजय :– अपि एतद् म्हादोः गृहम्।

नन्दिनी :– न हि। म्हादुः तु अस्मत्सेवकः। एतद् नरेन्द्रमहोदयस्य गृहम्।

विजय :– का भवती।

नन्दिनी :– अहं नरेन्द्रस्य पत्नी नन्दिनी। प्रविशतु भवान्। (विजयः विक्रमसिंहश्च गृहं प्रविशतः।) उपविशतां भवन्तौ। (उभौ उपविशतः।) कस्मात् आगतौ युवाम्।

विजय :– कथयिष्यामि। प्रथमं नरेन्द्रमहोदयं आह्वयतु भवती।

नन्दिनी :– (गृहाभ्यन्तरं दृष्ट्वा।) नाथ, सत्वरं आगच्छतु भवान्। एष कोऽपि ...।

विजय :– न यः कोऽपि। अहम् इन्स्पेक्टर विजयः।

नरेन्द्र :– (प्रविश्य) अहो आश्चर्यम्। कथं रक्षानिरीक्षकमहोदयाः अस्मद् गृहे।

विजय :– अस्ति तत्र कारणम्। अहम् इन्स्पेक्टर विजयः। एष च मे साहाय्यकः विक्रमसिंहः।

नरेन्द्र :– स्वागतम्। मन्ये म्हादुना किमपि दुष्कर्म कृतं स्यात्। तस्यैव कारणात् ....।

विजय :– कुत्रास्ति म्हादुः। युष्मत्सेवकः। तमेव आह्वयतु भवान्।

नन्दिनी :– रे म्हादो इत एहि रे दास्याःपुत्र।

नरेन्द्र :– भोः महोदय किम् अपकृतं म्हादुना।

म्हादु :– (प्रविश्य) कथं रक्षापुरुषौ। मा। मा ताडयतु। मा गृण्हातु वा। तानि काचपात्राणि ...।

नरेन्द्र :– कथय रे दास्याःपुत्र किं त्वया चोरितं हारितं वा। यस्य कारणात् एतौ रक्षापुरुषौ मम गृहं प्रविष्टौ।

विजय :– न तेन किमपि चोरितम् अपकृतं वा। न तस्य कोऽपि अपराधः।

नन्दिनी :– तर्हि किमर्थं ...।

विजय :– तिष्ठतु भवती। सर्वं स्पष्टं वदिष्यामि। विक्रमसिंह लिख। एतद् नरेन्द्रस्य गृहम्। तस्य भार्या नन्दिनी। तयोः सेवकः म्हादुः।

विक्रम :– लिखितम्।

विजय :– भोः म्हादो, इत आगच्छ। (म्हादुः न पुरःसरति।)

म्हादु :– परम् ...।

विजय :– अलं भयेन। इत एहि। (म्हादुःसमीपं गच्छति) वद। कियत् ते वयः।

म्हादु :– नाहं जानामि।

विजय :– अपि पाठशालां गच्छसि।

म्हादु :– न –न ..।

विजय :– भोः नरेन्द्र, अपि अष्टवर्षात्मकः दशवर्षात्मकः वा एष बालकः।

नरेन्द्र :– भवेत्। दशवर्षात्मकः भवेत्।

विक्रम :– लिखितम्।

विजय :– भवान् कियत् वेतनम् अस्मै ददाति।

नरेन्द्र :– अपि वेतनम्।

विजय :– आम्। वेतनम्।

नन्दिनी :– परं किमर्थं एतत् सर्वं पृच्छति भवान्।

विजय :– (उच्चैः) मया नरेन्द्रः पृष्टः। न भवती।

नन्दिनी :– क्षम्यताम्।

नरेन्द्र :– वेतनं ...। वेतनं तु न दीयते। परम् अन्नवस्त्रादिकं ...।

विजय :– मया पृष्टं रुप्यकाणि।

नरेन्द्र :– न रुप्यकाणि दीयन्ते। परम् अन्नं ...।

नन्दिनी :– स एतावद् अन्नं खादति। (हस्ताभ्यां दर्शयति) घस्मरः एव सः। सदैव बुभुक्षितः। (विजयः नन्दिनीं सक्रोधं पश्यति।)

विजय :– एवम्। तर्हि कथय रे म्हादो, अद्य आप्रातः त्वया किं किं भुक्तमिति।

म्हादु :– न किमपि। स्वामिन्या न किमपि दत्तम्।

विजय :– कस्मात्।

नन्दिनी :– अनेन मया क्रीतानि नूतनानि काचपात्राणि चूर्णितानि। तदर्थम् एष दण्डः।

विजय :– दण्डः। (वक्रोक्त्या) तर्हि भवती न्यायदानमपि करोति। कथय म्हादो। कुत्र ते पितरौ।

म्हादु :– न जानामि।

विजय :– कस्मात् ग्रामात् अत्र आगतोऽसि।

म्हादु :– न सम्यक् विजानामि। परम् अस्पष्टं स्मरामि। दूरे गिरिकन्दरे डुंगरवाडी इति अस्ति कोऽपि कुग्रामः।

विजय :– डुंगरवाडी कुत्रास्ति। नाम कस्मिन् प्रान्ते अस्ति।

म्हादु :– न जानामि।

विजय :– कथं तत्र गन्तव्यम्।

म्हादु :– कथमहं विजानीयाम्।

विजय :– कथं त्वम् अत्र प्राप्तः।

म्हादु :– यथा अहं स्मरामि तथा मम पितृभ्यां तं ग्रामं विहाय उदरभरणार्थं अस्मिन्नगरे स्थलान्तरं कृतम्। ताभ्यां सह...।

विजय :– विक्रमसिंह अपि लिखितम्।

विक्रम :– आम्।

विजय :– तर्हि नरेन्द्र कथमेष एतद् गृहं प्राप्तः।

नरेन्द्र :– शृणोतु भवान्। अस्य पितरौ अत्रैव पार्श्वे गृहनिर्माणकार्ये कर्मकरौ आस्ताम्।अहं तौ प्रतिदिनं पश्यामि स्म। ततः ताभ्यां परिचयः अभवत्। अथैकदा अस्य पित्रा चिरपरिचयाद् ऋणं प्रार्थितम्। तच्च मया दत्तम्।

विजय :– कियद् ऋणम्।

नरेन्द्र :– द्विसहस्ररुप्यकाणाम्।

विजय :– कदा।

नरेन्द्र :– पञ्चवर्षेभ्यः पूर्वम्। तच्च तेन न प्रत्यर्पितम्। अतः एष तस्य पुत्रः तेन अस्मद्गृहे सेवकरूपेण स्थापितः।

विजय :– सेवकरूपेण अथवा दासरूपेण।

नरेन्द्र :– न हि। न हि। न दासः। केवलं सेवकः भृत्यः वा।

विजय :– अपि विना वेतनम्।

नरेन्द्र :– पश्यतु भवान्। तद् द्विसहस्ररुप्यकाणाम् ऋणं चक्रवृद्ध्या अधुना ...।

विजय :– भोः स्मृत्यनुसारं कुसीदकं कदापि द्विगुणतां न याति। अन्यच्च ऋणं तु अस्य पित्रा गृहीतम्। न अनेन बालकेन। तर्हि कथं पितुरापराधे पुत्रस्य दण्डः।

नरेन्द्र :– परम् अन्यथा कथम् ऋणस्य प्रत्यर्पणम्।

विजय :– अपि त्वं कुसीदवृत्या जीवसि।

नरेन्द्र :– न हि। न हि। मम आपणमपि वर्तते।

विजय :– परं त्वं सरलवृद्ध्या चक्रवृद्ध्या वा ऋणं ददासि।

नरेन्द्र :– आम्।

विजय :– तत्कृते सर्वकारस्य अनुमतिपत्रं वर्तते वा।

नरेन्द्र :– न वर्तते।

विजय :– (विक्रमसिंहम् प्रति) अपि लिखितम् एतत् सर्वम्।

विक्रम :– आम्।

विजय :– तर्हि मह्यं देहि तल्लेखम्।

विक्रम :– (लेखं समर्पयति।) गृह्णातु भवान्।

विजय :– अधुना नरेन्द्र नन्दिनि सम्यक् श्रुणुतम्। उभौ अपि युवाम् अपराधिनौ।

नन्दिनी :– कः आवयोः अपराधः।

विजय :– प्रथमः। युवां कष्टमयेषु कार्येषु बालकं सेवकरूपेण नियोजयतः। द्वितीयः। युवाम् ऋणस्य कारणात् कमपि मनुष्यं दास्ये बध्नीतः। तृतीयः। युवां सर्वकारस्य अनुमतिपत्रं विना ऋणव्यवहारं कुरुतः। चतुर्थः। युवाम् अज्ञैः बालकैः सह क्रौर्येण व्यवहरतः। पञ्चमः ...।

नन्दिनी :– किमेते अपराधाः।

विजय :- आम्। अधिनियमानुसारेण कारावासेन दण्डनीयाः अपराधाः।

नरेन्द्र :- नैतन्मया ज्ञातपूर्वम्।

विजय :- विधेरज्ञानम् न दोषविमोचनहेतुर्भवितुमर्हति। अन्यच्च किमत्र ज्ञातव्यम्। बालकाः कोमलाः भवन्ति। न ते कठिनेषु कष्टमयेषु कार्येषु नियोक्तव्याः। किमेतत् पाठनीयम्। बालकैः सह प्रेम्णा व्यवहर्तव्यम्। न क्रौर्येण। किमेतदपि पाठनीयम्। नन्दिनि त्वं तु स्त्री असि। किं स्त्रीसुलभाः मातृसुलभाः भावाः अपि ते हृदये न वर्तन्ते।

नरेन्द्र :- शृणोतु भवान्। क्षम्यताम्। क्षम्यताम्।

विजय :- नाहं किमपि श्रोतुमिच्छामि। मया सह रक्षास्थानकं प्रति आगच्छतम्। दण्ड्यान् अदण्डयद्राष्ट्रं खलु विनश्यति। आगच्छतम्। विक्रमसिंह यदि एतौ न आगमिष्यतः तर्हि बन्दीकृत्वा नेतव्यौ।

विक्रम :- आम्। (तौ बन्दीकर्तुम् अग्रे सरति।)

म्हादु :- भोः इन्स्पेक्टरमहोदय प्रार्थये भवन्तम्। न एतौ कारागृहं नेतव्यौ। मत्कृते न दण्डनीयौ।

विक्रम :- अये कथम् ।

म्हादु :- भोः अन्नं कदन्नमपि भवेत् परं तद् एताभ्यां मह्यं प्रदत्तम्। कुवस्त्रमपि भवेत् परं तद् एताभ्यां प्रदत्तम्। अस्मिन् गृहे आश्रयः प्रदत्तः। एतयोर्विना न एतावदपि अन्नवस्त्रादिकं मया प्राप्तम् अभविष्यत्। एतयोः कारणादेव अहम् अत्र अद्यावधि जीवितोऽस्मि। उपकृतोऽस्मि एताभ्याम्।

नरेन्द्र :- (साश्रुनयनः) न हि। न हि रे बालक अपकृतोऽसि।

म्हादु :- मा। मा एवं वदतु भवान्। भोः इन्स्पेक्टरमहोदय न जाने कुत्र गतौ मे पितरौ। अधुना एतौ एव मे पितरौ इव। मम अन्नदातारौ मत्कारणात् न दण्डनीयौ। (इत्युक्त्वा विजयस्य पादयोः पतति।) क्षम्यताम्। क्षम्यताम् एतौ।

विजय :- उत्तिष्ठ। रे बालक उत्तिष्ठ। भोः पाषाणहृदयौ युवां पश्यतम्। पश्यतम् अस्य बालकस्य औदार्यं कृतज्ञतां स्नेहं मानुषत्वं च।

नन्दिनी :- (साश्रुनयना) आम्। दृष्टम् अनुभूतं च।

विजय :- अपि युवयोः अपत्यं नास्ति।

नन्दिनी :- अस्ति।

विजय :- कुत्रास्ति।

नन्दिनी :– निरपत्यया मया अधुनैव प्राप्तः पुत्रः। एहि रे पुत्रक। (म्हादुम् आह्वयति हस्तौ प्रसारयति च।)

म्हादु :– आम्। स्वामिनि।

नन्दिनी :– न स्वामिनी। मातः इति वद।

म्हादु :– आम्। मातः।

नरेन्द्र :– नन्दिनि इतःपरम् एष पुत्रवदेव अस्मद् गृहे स्थास्यति।

नन्दिनी :– न पुत्रवत्। परं पुत्रः इति।

नरेन्द्र :– आम्।

विजय :– परं नियमानुसारेण भवन्तौ रक्षास्थानकं नेतव्यौ।

म्हादु :– मा एवम्। न नेतव्यौ मे पितरौ। क्षन्तव्यौ।

विक्रम :– भोः इन्स्पेक्टर महोदय, अपि अहं किमपि वदानि।

विजय :– भण। स्वैरं भण।

विक्रम :– यदि म्हादोः परिपालनम् एतौ सम्यक् करिष्यतः। एतं पाठशालां प्रेषयिष्यतः। अनेन कठिनानि कष्टपूर्णानि कार्याणि न कारयिष्यतः। तर्हि ...।

विजय :– परं कस्तत्र प्रत्ययः।

विक्रम :– अहं प्रतिदिनम् अत्र आगत्य अत्रस्थां वार्तां भवते निवेदयिष्यामि।

विजय :– यदि एवं तर्हि तथास्तु। न नेष्याम्येतौ रक्षास्थानकम्। परं नरेन्द्र नन्दिनि शृणुतम्। मम गुप्तचराः अपि म्हादुना सह युवयोः व्यवहारविषये दक्षाः भविष्यन्तिः।

नरेन्द्र :– सुखं भवन्तु। एष तु पुत्रः आवयोः।

विजय :– अधुना विश्वसिमि भवन्तौ। अहं तु सत्यमेव रक्षापुरुषनिरीक्षकः। परं नैष रक्षापुरुषः। एष तु बालकः विक्रमः। रे विक्रम तव सत्यं रूपं दर्शय। (विक्रमसिंहः श्मश्रु दूरीकरोति।) अनेन प्रार्थितं साहाय्यम् अस्य म्हादोः विषये। अतः ....।

नरेन्द्र :– अस्तु। तद् ईषत्कपटं कल्याणार्थमेव प्रयुक्तं। अतः न तत्र कोऽपि दोषः।

विजय :– रे विक्रम, यथा त्वया वाञ्छितं तथा तव साहाय्यं कृतम्। त्वं तु अधुना मम मित्रम्। परम् आह्वय तव अन्यानि मित्राणि। (विक्रमः बहिर्गत्वा मित्राणि आह्वयति। पार्श्वे गत्वा उच्चैः वदति। हे अशोक, लते, कले आगच्छतम्। आगच्छतम्। सत्वरम् आगच्छतम्।)

विजय :– तर्हि म्हादो ...।

नन्दिनी :– न म्हादुः। परं महादेवः। म्हादुस्तु तस्य अपभ्रष्टं नाम।

विजय :– एवम्। साधु। साधु। (प्रविशन्ति विक्रमः अशोकः लता कला च।) पश्यत रे बालकाः यथा युष्माभिः प्रार्थितं तथा विमुक्तः एष म्हादुः .. .. न हि न हि महादेवः दास्यबन्धनात्। प्राप्तौ च तेन एतौ धर्मपितरौ। इतःपरं स युष्माभिः सह पाठशालां गमिष्यति। क्रीडिष्यति हसिष्यति खेलिष्यति च। किमन्यद् वाञ्छनीयम्।

लता :– न किमपि। तथापि अस्तु भगवच्चरणारविन्दे एषा प्रार्थना।

(सर्वे गायन्ति।)

जय जय शङ्कर भक्तजनानामियं प्रार्थना पदकमले।
वितर समृद्धिं सौख्यं शान्तिं भवेन्न दास्यं मनुजकुले ।।१।।
विकसति कुसुमं यथा लतायामथवा पादपसमुदाये।
तथा विकसिता मानवजातिर्भूयादस्मिन्धरणितले ।।२।।
हिंसारहितं क्रौर्यविरहितं भवेज्जीवनं करुणाब्धे।
सद्गुणयुक्ताः कर्मणि दक्षा भवन्तु मनुजाः कृपया ते ।।३।।

– इति लेखनसीमा –

बालकाः वयम् नाटकस्य प्रथमः प्रयोगः

दिनांक १६-११-२००७

सावित्रीबाई फुले नाट्यगृहम्, डोम्बिवली

अभिनेतारः

सूत्रधारः निरीक्षकः च : प्रसाद भिडे

नन्दिनी : अर्चना कतिरा

म्हादू : सुमेध जोशी

विक्रमः विक्रमसिंहः च : विराज जोशी

अशोक : मृगांक दिवेकर

कला : मृण्मयी गोडसे

लता : बेला जोशी

नरेन्द्र : मितेश कतिरा

साहाय्यकाः

रङ्गभूषा : निशिकान्त उजवणे

वेषभूषा : प्राजक्ता गोडसे

प्रकाशयोजना : आनन्द केळकर

नेपथ्यम् : प्रसाद गोडसे, विनय दांडेकर

नेपथ्य साहाय्यम् : चन्द्रशेखर कुलकर्णी, चन्द्रशेखर वझे, धनंजय दिवेकर

संगीतम् गायनम् च : निलिमा पुराणिक

तबलावादनम् : मकरन्द विष्णुपुरीकर

नृत्य दिग्दर्शनम् : मेधा दिवेकर

निर्मितिप्रमुखा : मुग्धा गोळे

दिग्दर्शनम् : प्रभाकर भातखण्डे

(महाराष्ट्र राज्य नाट्यस्पर्धायां संस्कृत विभागे महाराष्ट्र सेवा संघ मुलुन्ड द्वारा निर्मितम् एतन्नाटकम् तृतीय पारितोषिकेण सम्मानितम्। तत्र प्रसाद भिडे महोदयः अभिनयनैपुण्यार्थं रौप्यपदकेन पारितोषिकेण च सम्मानितः। तथैव विराज जोशी महोदयःप्रशंसापत्रेण सम्मानितः।)

– बालादपि –

(सदृशवस्त्राः बालबालिकाः जवनिकायाः जवनिकां गायन्त्यः नृत्यन्त्यः गच्छन्ति। परिवृत्य च प्रथमां जवनिकां प्रत्यागच्छन्ति।)

सा-ग-सा-ग - मग-रेसा-रे
ध-रे-ध-रे - गरे-सा-नि-सा
हर ॐ हर ॐ हर हर ॐ
हर ॐ हर ॐ हर हर ॐ
सा-प-सा-प - निध-पम-प
ममम-ममग - मध-पम-ग
हर ॐ हर ॐ हर हर ॐ
हर ॐ हर ॐ हर हर ॐ
प-सा-प-सा - निध-ध-पम
ममम-ममग - मध-पम-ग
हर ॐ हर ॐ हर हर ॐ
हर ॐ हर ॐ हर हर ॐ
सा-ग-सा-ग - मग-रेसा-रे
ध-रे-ध-रे - गरे-सा-नि-सा
हर ॐ हर ॐ हर हर ॐ
हर ॐ हर ॐ हर हर ॐ

(ततः अन्तर्हिताः बालबालिकाः। बालकान् पश्यन् तथैव गायन् नृत्यन् च प्रविशति वासुदेवः। रङ्गमञ्चस्य मध्यभागपर्यन्तं नृत्यन्नेव गच्छति।)

वासुदेव :- सा-ग-सा-ग - मग-रेसा-रे
ध-रे-ध-रे - गरे-सा-नि-सा
हर ॐ हर ॐ हर हर ॐ
हर ॐ हर ॐ हर हर ॐ

(प्रेक्षकान् दृष्ट्वा।) स्वागतम्। नमो नमः। अपि दृष्टम्। अहमपि बालकः इव नृत्यामि। गायामि च। अस्तु। शृणुत भोः सज्जनाः। अथ एकदा जगन्मायया पार्वत्या शिवः

पृष्टः। भगवन् समाधौ भवान् कं ध्यायति इति। तदा शिवेन उक्तं श्रीरामम् इति। तथैव केनापि पृष्टः विष्णोरवतारः श्रीरामः उक्तवान् शिवं पार्वतीशं ध्यायामि इति। शिवः रामं ध्यायति। रामश्च शिवम्। भगवान् श्रीकृष्णः अपि रामः इव श्रीविष्णोरवतारः। तस्यैव भगवतः बालकृष्णस्य दासानुदासोऽहम्। अतः शिवं ध्यायामि। नटेश्वरं नटनाटकं रङ्गदैवतं श्रीमच्छङ्करं ध्यायामि। (गायति।)

शम्भो शिव हर हे गङ्गाधर पार्वतीश हर ॐ।
शृणु हे शङ्कर वासुदेवकृत स्तवमालां हर ॐ।।धृ।।
अकिञ्चनस्त्वं रत्नाभरणां वसुन्धरां ननु धारयसे
दिगम्बरस्त्वं त्वचाच्छादनैर्भूतग्रामं छादयसे ।
श्मशानवासिन् सर्वनिवासस्त्वयैव शङ्कर विधीयते
विरागिणस्तव द्वे भार्ये ननु कथं परं हे भूतपते ।।१।।
प्रभो साम्प्रतं सौख्यं नष्टं दुःखे मग्ना दीनजनाः
नैव सत्कृता नैव वाञ्छिता युवायुवतिभिर्वृद्धजनाः।
स्त्रीपुरुषाणां शीलं भ्रष्टं दुराचारिणो मोदन्ते
मनुजाः सर्वे धनलोभान्धा भ्रष्टाचारा वर्धन्ते ।।२।।
भुवः कम्पनैस्तोयविप्लवैर्झञ्झावातैः सवृष्टिकैः
वयं तु भीता हे गणपालक प्रभावैस्तथा प्राकृतिकैः।
संहर सर्वं विनाशजालं देहि सुबुद्धिं मनुजेभ्यो
भूलोकेऽस्मिन्स्वास्थ्यं सौख्यं तवैव कृपया भवतु विभो ।।३।।
सदाचारिणः सुबुद्धियुक्ताः परोपकारे दत्तधनाः
भूतदयान्वित मनसा मनुजाः सुधना भूयुर्मनःश्रिया।
यथा याचते जलं चातको मेघं दृष्ट्वा नभसि विभो
तथा जनोऽयं कृपां याचते नत्वा मौलिं प्रभो विभो ।।४।।
शम्भो शिव हर हे गङ्गाधर पार्वतीश हर ॐ।
शृणु मे शङ्कर याचनामिमां जगदीश्वर हर ॐ।।

(नेपथ्ये श्रूयते बालकैर्गीतम्। हर ॐ हर ॐ हर हर ॐ। हर ॐ हर ॐ हर हर ॐ।)

भोः सज्जनाः इमे बालकाः अद्यापि गायन्ति नृत्यन्ति च। मया तु विस्मृतप्रायमेव मे बाल्यम्। अहह। ते हि नो दिवसा गताः। सततम् उदरभरणचिन्तायां वर्तमानोऽहं सुखं न लभे। भवतु। बालकैः सह कञ्चित्कालं क्रीडिष्यामि तावत् च विस्मरिष्यामि मे चिन्ताम्। (निर्गमनं नाटयन् पुनरपि परावृत्य) अहो विस्मृतम् एव मया। कथाम्। कथां तु पश्चात् कथयिष्यामि।

सा-ग-सा-ग -मग-रेसा-रे
ध-रे-ध-रे -गरे-सा-नि-सा।
(इति गायन् निर्गतः।)

(द्वितीयः प्रवेशः)

(रङ्गमञ्चस्य षष्ठांशभागे दृश्यते कस्यापि गृहस्य बाह्यभागः। तत्र च वर्तते गृहसीमां दर्शयन्ती काष्ठशलाकावृत्तिः। तस्मिन्नेव भागे आसन्दे उपविष्टः गृहस्वामी पशुपतिः वृत्तपत्रं पठति। रङ्गमञ्चस्य शेषभागस्तु गृहाङ्गणवत्। तत्र प्रविशति भालचन्द्रः।)

भालचन्द्र :- न कोऽपि अत्र दृश्यते। भोः मन्दार आगच्छ। (प्रविशति मन्दारः।) पश्य मम भ्रमरकम्।

मन्दार :- पश्य ममापि भ्रमरकम्।

भालचन्द्र :- ममैव भ्रमरकम् अप्रतिमम्।

मन्दार :- नहि। नहि। ममैव अप्रतिमम्। तव भ्रमरकं तु सवेगं न भ्रमति।

भालचन्द्र :- भ्रमत्येव।

मन्दार :- न भ्रमति।

भालचन्द्र :- भोः किं जल्पितेन। न तेन किमपि निर्णीतं भवति। एहि। भवतु आवयोः भ्रामरं युद्धम्। यस्तत्र जेष्यति तस्यैव भ्रमरकम् अप्रतिमम्।

मन्दार :- स्वीकृतम्। एहि। (द्वावपि आत्मनः भ्रमरके भूमौ प्रक्षिपतः।)

भालचन्द्र :- रे मन्द मयैव जितम्।

मन्दार :- रे भालुक सम्यक् ब्रूहि। नाहं मन्दः परं मन्दारः। मयैव जितम्।

भालचन्द्र :- रे मन्द त्वमपि सम्यक् ब्रूहि। नाहं भालुकः परं भालचन्द्रः। मयैव जितम्।

मन्दार :- भालुकः।

भालचन्द्र :- मन्दः।

मन्दार :- भालुकः।

भालचन्द्र :- मन्दः।

पशुपति :- भोः शान्तम्। न अत्र कोलाहलः करणीयः। अपि न दृश्यते अहमत्र पठामीति।

(उभौ तत् न शृणुतः। ततः प्रविशति परशुरामः।)

परशुराम :- भोः किं कुरुथः।

मन्दार :- भ्रामरं युद्धम्।

परशुराम :- किमर्थम्।

भालचन्द्र :- कस्य भ्रमरकम् अप्रतिमम् इति निर्णयार्थम्।

मन्दार :- मया जितं तद् युद्धम्।

भालचन्द्र :- नैव। नैव। मयैव जितम्।

परशुराम :- दर्शयतम्। दर्शयतम् युवयोः भ्रमरके। (उभौ आत्मनः भ्रमरके दर्शयतः।)

मन्दार :- पश्य। पश्य।

परशुराम :- (निरीक्ष्य) हॅः। उभे अपि निःसत्वे। (द्वे अपि भ्रमरके भूमौ प्रक्षिप्य।) पश्यत मम भ्रमरकम्। (आत्मनः भ्रमरकं दर्शयति।) बलवदेतत्। दारुनिर्मितम्।

भालचन्द्र :- रे ऽऽ पेन्द्या।

परशुराम :- किम्। किं वदसि।

भालचन्द्र :- पेन्द्या।

परशुराम :- नाहं पेन्द्या।

भालचन्द्र :- ॲहॅहॅ। पेन्द्या एव। केवलं नाम्ना एव परशुरामः। तस्य परशुरामस्य इव कुत्र वर्तते तव तेजः। त्वं तु दुर्बलः। काष्ठवत् निःसत्त्वः। अत एव पेन्द्या इति ते अन्यतमा संज्ञा सर्वैः कृता।

परशुराम :- एवम्।

भालचन्द्र :- आम् । एवम्।

परशुराम :- भोः तिष्ठतम्। अधुनैव दर्शयामि मे सामर्थ्यम्।

(परशुरामः मन्दारं गलेन धृत्वा ताडयति। भालचन्द्रः परशुरामं पृष्ठतः ताडयति।)

भालचन्द्र :- गृहाण एतत्। (मुष्टिप्रहारं करोति।) मुञ्च। मुञ्च एनम्।

पशुपति :- (उच्चैः।) रे दास्याःपुत्राः निर्गच्छत। गृहं गच्छत। (बालकाः न शृण्वन्ति।) आः। न सहे। न सहे अधुना। (कर्णौ पिधत्ते।) एतेषाम् मातरः पितरश्च जन्तवः एव। केवलं जनयन्ति जन्तून्। न सम्यक् पाठयन्ति। न संस्कारान् कुर्वन्ति। (आसन्दतः उत्थाय गृहाङ्गणं प्रविश्य।) भोः दास्याःपुत्राः निर्गच्छत। (हस्तेन ताडनं नाटयन्।) अपसरत रे गर्दभाः। अपसरत।

(बालकाः भीताः इव पलायन्ते। पटान्तरं च प्रविशन्ति।)

पशुपति :- गताः। मूर्खाः।

(यावत् पशुपतिः पुनरपि गृहभागं प्रविशति तावत् नेपथ्ये श्रूयते।

सा-ग-सा-ग -मग-रेसा-रे -ध-रे-ध-रे -गरे-सा-नि-सा।)

(ते एव त्रयः बालकाः एकैकशः गृहाङ्गणं सावधानं प्रविशन्ति।)

भालचन्द्र :- गतः। आगच्छ रे पेन्द्या। आगच्छ। गतः। स गतः। गृहाभ्यन्तरं गतः।

परशुराम :- अपि सत्यम्।

भालचन्द्र :- आम् । सत्यम्।

परशुराम :- भोः मन्द एहि। गतः सः।

मन्दार :- भोः अधुना केन क्रीडिष्यामः।

भालचन्द्र :- केन क्रीडिष्यामः।

परशुराम :- पश्य। ताः बालिकाः इत एव आगच्छन्ति। ताभिर्मिलित्वा क्रीडिष्यामः। (तिस्रः बालिकाः नृत्यन्त्यः प्रविशन्ति। कस्याः अपि हस्ते वर्तते पुत्तलिका। तस्मिन्नभ्यन्तरे पशुपतिः अपि गृहात् बहिरागत्य गृहभागे एव आसन्दे उपविशति।)

बालिकाः :- पुत्तलिका मे पुत्तलिका
गौराङ्गी मे पुत्तलिका ।।धृ।।
चार्वी ललिता सुकोमला
शशाङ्कवदना पुष्पसमा ।
षोडशवर्षा मीनाक्षी
वस्त्राभरणैरलङ्कृता ।।१।।
आबाल्याद् या सुलालिता
विवाहयोग्या ननु जाता ।
सहेय विरहं न्वहं कथम्
यास्यत्यधुना पतिगेहम् ।।२।।
विश्वसुन्दरी खल्वेषा
वराय कस्मै दातव्या ।
सैनिकाय नो न मन्त्रिणे
परिणेष्यति राजा त्वेनाम् ।।३।।

भालचन्द्र :- तिष्ठत। गिरिजे किमेतत् प्रचलति।

गिरिजा :- विवाहमङ्गलम्।

भालचन्द्र :- अपि सत्यम्।

गिरिजा :- आम्।

भालचन्द्र :- कस्याः।

गिरिजा :- अपि न पश्यसि। अस्याः मम पुत्तलिकायाः।

परशुराम :- गिरिजे एषा ते पुत्तलिका वधूः। परं वरः कुत्र वर्तते।

मुग्धा :- रे पेन्द्या त्वमेव वरः।

(सर्वाः बालिकाः हसन्ति।)

परशुराम :- हॅः।नाहं पुत्तलिकायाः वरः भवेयम्।

गिरिजा :- भव। भव।

ईशा :- ईदृशी वधूः त्वया कथं प्राप्यते अन्यथा।

परशुराम :- ईशे, ताडयिष्यामि। अलं परिहासेन।

भालचन्द्र :- तिष्ठत। गिरिजे एहि। भ्रमरकैः खेलामः।

ईशा :- परम् अस्मत्सविधे भ्रमराकाणि न सन्ति।

भालचन्द्र :- तर्हि कथं खेलामः।

गिरिजा :- भालुक अद्य विवाहः विवाहः इत्येव क्रीडिष्यामः।

भालचन्द्र :- स्वीकृतम्। अपि स्वीकृतं वा रे मन्द रे पेन्ड्या ...।

परशुराम :- आम्।

मन्दार :- आम्।

भालचन्द्र :- गिरिजे तव पुत्तलिकायाः विवाहमङ्गले वयं सर्वे सहभागिनः भवामः।

ईशा :- तर्हि आगच्छत।

भालचन्द्र :- अहं वधूपिता भवेयम्। एष पेन्ड्या च पुरोहितः। भोः मन्द त्वं कः भविष्यसि।

परशुराम :- अहं गीतगायकः वाद्यवादकश्च भवेयम्।

गिरिजा :- साधु। तर्हि प्रारभस्व।

परशुराम :- (परशुरामः वाद्यवादनं नाटयति कर्कशस्वरेण गायति च।) टँट टॅऽऽ टटट्या टट्या...

ईशा :- (कर्णौ पिधाय) अलम् अलं वादनेन। वयं गीतं गायामः। मुग्धे प्रारम्भं कुरु।

मुग्धा :- किमर्थं मया एकलया एव गातव्यम्। सर्वे गायन्तु मया सह।

ईशा :- स्वीकृतम्।

सर्वे :- (गायन्ति।) सोत्साहं नृत्यामः सर्वे
सानन्दं गायामः सर्वे
परिणये पाञ्चाल्याः।।
पश्यन्ती राजानं मुग्धा
गन्ता वै लजमाना स्निग्धा
वरेण सह सानन्दम्।।

पशुपति :- (उच्चैः) शान्तम्। शान्तम्। किमर्थम् आक्रन्दथ।

गिरिजा :- भवानेव आक्रन्दति। न वयम्। वयं तु गायामः। सुस्वरम्।(सर्वे बालकाः बालिकाश्च पुनरपि गायन्ति।)

पश्यन्ती राजानं मुग्धा
गन्ता वै लजमाना स्निग्धा
वरेण सह सानन्दम्।।

पशुपति :- (उच्चैः) तिष्ठत। तिष्ठत। तिष्ठत।

गिरिजा :- मुग्धे, ईशे, पेन्द्या, भालो, मन्द सर्वे तिष्ठत। एष वदति। (पशुपतेः स्वरम् अनुकृत्य) तिष्ठत। तिष्ठत। तिष्ठत। (बालाः हसन्ति।)

पशुपति :- (उच्चैः) भोः निरर्गलाः यूयम्। कथं हसथ। किमर्थम् अत्र क्रीडथ। कथं क्रीडाङ्गणे न गच्छथ।

भालचन्द्र :- क्रीडाङ्गणम्। कुत्र वर्तते क्रीडाङ्गणम्। सर्वत्र भवनानि विरचितानि। अस्मिन् कृत्रिमे आवासजङ्गले कुत्रास्ति क्रीडाङ्गणम् अस्मादृशानां बालकानां कृते।

पशुपति :- कस्मात् मां पृच्छसि। गच्छत। अत्र कोलाहलं न वाञ्छामि। एतद् मम गृहम्। एतद् मम अङ्गणम्।

मन्दार :- भोः पेन्द्या किमर्थम् एष मम अङ्गणम् मम अङ्गणम् इति वारंवारम् उद्घोषयति।

पशुपति :- रे दास्याःपुत्र श्रुतं मया। सर्वं श्रुतम्। अद्यावधि परस्परं गलेन धृत्वा परस्परैः योध्यमानाः यूयं त्रयः शत्रवः कथम् अधुना एकेनैव स्वरेण वदथ।

परशुराम :- भोः न शत्रवः। वयं तु मित्राण्येव। तद् बाहुयुद्धं क्षणिकमेव आसीत्।

भालचन्द्र :- आम्। अस्माकं मैत्र्याम् ईदृशाः क्षणिकाः युद्धप्रसङ्गाः समुद्भवन्त्येव। परं तत्क्षणानन्तरं सर्वं विस्मृत्य वयं सममेव खेलामः।

पशुपति :- खेलत। सुखं खेलत। गायत। नृत्यत। परं न अत्र। मम अङ्गणे...

भालचन्द्र :- भोः एतद् भवतः अङ्गणं भवता किमर्थम् अत्र स्थापितम्। गृहाभ्यन्तरं नयतु भवान् एतद् अङ्गणम्। (बालाः हसन्ति।)

पशुपति :- तव पित्रा नीयते वा। रे मूढ निरर्गलं प्रलपसि।

ईशा :- भोः कथं भवान् गालीः ददाति। मम पितामहः वदति गालिदायकः आगामिनि जन्मनि कीटकः भवति इति।

पशुपति :- किम्। कीटकः। अहं कीटकः। तव पिता कीटकः। तव पितामहः कीटकः। यूयं सर्वे कीटकाः। (क्रोधेन) इतो निर्गच्छत। निधनं गच्छत।

भालचन्द्र :- गमिष्यामः। अलम् आक्रोशेन। अत एव सर्वे जना भवान् पशुः अस्ति इति वदन्ति।

पशुपति :- किमहं पशुः।

भालचन्द्र :- इत्थं जनाः वदन्ति। न वयम्।

पशुपति :- के वदन्ति। किं वदन्ति।

भालचन्द्र :- अन्यस्मिन् दिने चतुष्पथे केचन जनाः अन्यैः सम्भाषमाणाःआसन्। तदा पाठशालां गच्छद्भिः अस्माभिः श्रुतम्।

पशुपति :- किम्। किं श्रुतम्।

भालचन्द्र :- एष पशुपतिः पशुः एव। स श्वानवत् गुर्गुरायते।

परशुराम :- व्याघ्रवत् आक्रोशति।

मन्दार :- उलूकवत् पश्यति।

भालचन्द्र :- सर्पवत् दीर्घद्वेषं करोति।

परशुराम :- वृश्चिकवत् दशति।

पशुपति :- तिष्ठत रे दास्याःपुत्राः। अधुनैव दर्शयिष्ये मे पशुत्वम्। (हस्तेन काष्ठं गृहीत्वा सक्रोधं काष्ठशलाकावृतेरुपरि आरोढुकामः काष्ठशलाकावृत्या सह अधः अङ्गणे भूमौ निपतति। आक्रन्दति। वेदनाः नाटयति।)

ईशा :- (तालिकावादनं कृत्वा) पतितः। पतितः। देवेन पातितः।

गिरिजा :- ईशे कथं तालिकावादनं करोषि। नैष आनन्दसमयः। पश्य। स आक्रन्दति। तस्य वेदनाः भवन्ति। आगच्छत । तस्य साहाय्यं करिष्यामः। (सर्वे पशुपतिसमीपं गच्छन्ति।)

परशुराम :- (पशुपतिं पृच्छति।) भोः अपि वेदनाः भवन्ति किम्।

भालचन्द्र :- अपि क्षतं वर्तते वा।

मुग्धा :- कुत्रापि रक्तं तु न दृश्यते।

ईशा :- (समीपं गत्वा निरीक्ष्य) भोः मन्ये मृतः।

गिरिजा :- (निरीक्ष्य) भोः मूर्च्छितः एषः। पेन्द्या, रे मन्द, गृहाभ्यन्तरं गत्वा जलम् आनयतम्। शीघ्रम्।

(परशुरामः मन्दारः च धावन्तौ गृहाभ्यन्तरं प्रविशतः। ईशा वस्त्रेण वीजनं नाटयति।)

भालचन्द्र :- भोः तात, अपि शृणोषि।

ईशा :- कथं शृणुयात्। मूर्च्छितः एषः।

भालचन्द्र :- रे मन्द, शीघ्रम् आनय जलम्।

मन्दार :- (परशुरामेण सह हस्ते जलभाजनं गृहीत्वा प्रविश्य।) गृहाणैतत्।

भालचन्द्र :- (पशुपतेः मुखोपरि जलसेचनं कुर्वन्) तात जागृहि। जागृहि। धारय आत्मानम्। (पशुपतिः शनैः शनैः नेत्रे उन्मीलयति।) पिब।

(भालचन्द्रः जलं पाययति) शनैः पिब। आम्। एवमेव।

मन्दार :- रे पेन्द्या, तातस्यार्थे आसन्दम् आनय।

परशुराम :- एष आनयामि। (गृहभागं प्रविशति।)

गिरिजा :- अपि अधुना स्वस्थो भवान्।

पशुपति :- आम्।

परशुराम :- (हस्ते आसन्दं गृहीत्वा प्रविश्य) अत्र स्थापयामि।

भालचन्द्र :- तात, अत्र उपविश। रे मन्दार, साहाय्यं कुरु।(त्रयः बालकाः पशुपतेः साहाय्यं कुर्वन्ति। पशुपतिम् आसन्दे उपवेशयन्ति।) आम्। शनैः। इत्थमेव। उपविश अस्मिन् आसन्दे। (पशुपतिः वेदनाः नाटयन् आसन्दे उपविशति।)

पशुपति :- किमेतत्। कुत्र अहम्।

गिरिजा :- भवान् भवतः एव गृहाङ्गणे अस्ति। (काष्ठशलाकावृत्तिं दर्शयित्वा) अत्रतः पतितः मूर्च्छितश्च।

पशुपति :- अपि अहं पतितः।

गिरिजा :- आम्।

पशुपति :- कथं पतितः।

गिरिजा :- क्रोधाविष्टो भवान् ...

पशुपति :- किमहं क्रुद्धः।

भालचन्द्र :- आम्।

पशुपति :- कस्मात्।

मन्दार :- अस्माभिः यः कोलाहलः कृतः ...

पशुपति :- अधुना किञ्चित् किञ्चित् स्मरामि। अपि अहं युष्माकं कोलाहलेन क्रुद्धः।

भालचन्द्र :- आम्।

पशुपति :- तर्हि मूर्खोऽहम्।

ईशा :- न हि। नहि। कः एवं वदति।

पशुपति :- अहं वदामि। यः बालकानां कारणात् एतावत् क्रुध्यति स मूढः एव। भोः मया कृतं वाक्ताडनं सर्वं विस्मृत्य युष्माभिः सर्वैः मम साहाय्यं कृतम्। पुनरुज्जीवितोऽहम्। उपकृतोऽहम्। सम्यक् शिक्षितोऽपि च। आः वेदनाः मां बाधन्ते।

मुग्धा :- अपि अस्थिभङ्गः ...

पशुपति :- (निरीक्ष्य) न अस्थिभङ्गः। परम् अहङ्कारभङ्गः।

गिरिजा :- किं नाम अहङ्कारः।

पशुपति :- अपि न जानासि। न ज्ञास्यसि। बालिकासि।

गिरिजा :- मम मातापि बहुवारम् एवमेव भणति।

पशुपति :- सम्यक् एव वदति सा। बालकाः अहङ्कारं दर्पं कामं क्रोधं ज्ञानम् अज्ञानं मामकत्वं परकीयत्वं वा न जानन्ति। तत्सर्वं दोषभाण्डारम् अनन्तरम् अर्ज्यते मनुष्यैः। अहमपि पुनरपि बालकः - युष्मादृशः बालकः– भवितुम् इच्छामि। ऋजुः सरलः पारदर्शकः निष्पापः बालकः ...।

भालचन्द्र :- तर्हि भव। कः प्रत्यवायः।

पशुपति :- न तद् अधुना शक्यम्। परं पूर्वम् अहं बालकः एव आसम्।

भालचन्द्र :- अपि सत्यम्।

पशुपति :- सत्यम्। हसन् खेलन् क्रीडन् पतन् धावन् बालकः। पशुपतिनाथः बालकः। तेन बालकेन पशुपतिनाथेन मेलितुम् इच्छामि। तम् आलिङ्गितुम् इच्छामि।अपि तत् शक्यम्।

भालचन्द्र :- आम्। शक्यम्।

पशुपति :- कथमिव।

भालचन्द्र :- अस्मादृशः भव। अस्माभिः सह क्रीड। एहि।

मन्दार :- सम्यक् वदति एष भालुकः। एहि पशु-पति-नाथ। न न। एहि प-प-ना।

गिरिजा :- रे मन्द, न एवं वक्तव्यम्। पशुपतिनाथ एति वद।

मन्दार :- क्षम्यताम्। क्षम्यताम्।

पशुपति :- भोः न अत्र किमपि अपराद्धम्। यथा एष परशुरामः पेन्द्या, एष भालचन्द्रः भालुकः, मन्दारश्च मित्रेषु मन्दः इति भवन्ति तथैव अहमपि मम मित्रेषु युष्मासु ...

सर्वाः बालिकाः :- तातः।

भालचन्द्र :- साधु। साधु। इतः परम् अस्मासु एष तात इत्येव आह्वातव्यः।

पशुपति :- अस्तु। स्वीकृतम्। परं युष्माभिः सर्वैः प्रतिदिनम् अत्रैव युष्माकम् अङ्गणे मया सह क्रीडितुम् आगन्तव्यम्।

सर्वे :- आगमिष्यामः। आगमिष्यामः।

वासुदेव :- (प्रविश्य) आगमिष्यामि। अहमपि आगमिष्यामि। न हि। न हि। आगतः एव अहम्। बालकानां मनोरञ्जनार्थम् आगतः। वासुदेवोऽहम्। बालस्य कृष्णस्य दासानुदासः।

पशुपति :- कथं बालस्य कृष्णस्य एव। किमर्थं न भगवतः कृष्णस्य।

वासुदेव :- भोः न तथा रोचते मे प्रौढः श्रीकृष्णः यथा रोचते बालः कृष्णः। अहम् एवं चिन्तयामि।

पशुपति :- कथमिव।

वासुदेव :- यदि प्रौढः श्रीकृष्णः महाभारतीययुद्धानन्तरं पुनरपि गोकुलं प्रत्यागमिष्यत् तर्हि गोपिकाभ्यः अपि

न स अरोचिष्यत। अतः मम कृष्णः कदापि न वर्धते। मत्कृते तु स सदैव बालः एव भवति। अतः तम् ऋजुं परिहासशीलम् अनागसं बालकृष्णमेव प्रार्थये।

(कश्चन बालकः वासुदेवेन प्रदत्तां वेणुं हस्ते धृत्वा व्यत्ययाकलितपादमास्थितः कृष्णः इव नाटयति। द्वे बालिके दास्यौ इव तस्य वामपार्श्वे दक्षिणपार्श्वे च नमस्कारं कुर्वत्यौ तिष्ठतः। अन्ये सर्वे श्रीकृष्णं नमन्ति। वासुदेवः गायति।)

करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम् ।
वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि ।।धृ।।
सकौतुकं गोकुलगामिनं तं सुनन्दकं नन्दगृहे वसन्तम् ।
निर्व्याजवृत्तिं परिहासशीलं बालं मुकुन्दं मनसा स्मरामि ।।१।।
उद्घाट्य मृल्लाञ्छितमास्यपद्मं मुखारविन्दे हि समस्तविश्वम् ।
अम्बां यशोदां ननु दर्शयन्तं बालं मुकुन्दं मनसा स्मरामि ।।२।।
तदात्मलीनं सुरूपं कुरूपं स्पर्शेन भूयादिति चिन्तयामि ।
अतो मदीये विनिमील्य नेत्रे बालं मुकुन्दं मनसा स्मरामि ।।३।।

– इति लेखनसीमा –

बालादपि नाटकस्य प्रथमः प्रयोगः

दिनांक ०८-०२-२००६

भरत नाट्य संशोधन मन्दिरम्, पुण्यपत्तने

अभिनेतार :

वासुदेव	:	सचिन मोहिते
पशुपति	:	वीरेश कांबळी
भालचन्द्र	:	सुमेध जोशी
मन्दार	:	चिन्मय देशमुख
परशुराम	:	संकेत कुलकर्णी
गिरिजा	:	बेला जोशी
मुग्धा	:	चिन्मयी वझे
ईशा	:	अवनी दांडेकर

साहाय्यका :

रङ्गभूषा	:	निशिकान्त उजवणे
प्रकाशयोजना	:	चन्द्रशेखर कुलकर्णी
नेपथ्यम्	:	प्रसाद गोडसे, विनय दांडेकर
नेपथ्य साहाय्यम्	:	चन्द्रशेखर वझे, अवधूत गोळे, राम पाणकर
संगीतम्	:	निलिमा पुराणिक
गायनम्	:	गीता पुराणिक
ढोलवादनम्	:	मकरन्द विष्णुपुरीकर
नृत्य दिग्दर्शनम्	:	अंतरा चौगुले, सोनाली जामडे
वेषभूषा	:	भावना दांडेकर
निर्मितिप्रमुखा	:	मुग्धा गोळे
दिग्दर्शनम्	:	संदीप भातखण्डे
मार्गदर्शनम्	:	प्रभाकर भातखण्डे

Bhawan's Sri Sankaracharya ... 681 ... Bharatiya

(महाराष्ट्र राज्य नाट्यस्पर्धायां संस्कृत विभागे महाराष्ट्र सेवा संघ, मुलुन्ड द्वारा निर्मितम् एतन्नाटकम् द्वितीय पारितोषिकेण सम्मानितम्।)

awan's Sri Sankarachar

About the Author

Prabhakar Mahadeo Bhatkhande
B.A. (Hons.) D.S.W. (L.W.)
Born 12-9-1940

Sanskrit One Act Plays

» Mukta
» Vruksharakshanam
» Ehi Mrutyo Swagatam Te
} Published under the title Mukta

» Mahadanam
» Dhanam va Sheelam va
» Kara
» Ashmabuddhih
} Published under the title Mahadanam

» Lalanakhyanam
» Shilpagoodha
» Iti Manaveeyam
} Published under the title Lalanakhyanam

» Modaya Nanu Vardhakyam
» Charati Charato Bhagah
» Vidushakeeyam

» Tapah Phalodayah
» Ishavasyamidam
» Devadapi Gariyasi
» Vanchate Parivanchate
» Nrityakootam
» Balakah Vayam
» Baladapi
} In this Book

* Won Prizes for four Radio Plays. Won First, Second & Third prizes for four Radio Plays in four consecutive years in All India Radio Competitions for Radio Playwrights
* Many talks & programmes concerning Sanskrit on All India Radio
* Many articles in Marathi & Hindi
* Acted in Many Marathi & Sanskrit Plays
* Deerghakavya in Sanskrit specially for dance by name 'Rutuvilasah'
* 'Char Purushartha' Book in Marathi depicting the model ways to lead the life as contained in Sanskrit literature.

* Recipient of Maharashtra Rajya Mahakavi Kalidas Sanskrit Sadhana Puraskar 2008-09